CC-0. In Public Domain. Digitization by eGangotri

प्राक्कथन

इस भाग में ३५ पाठ हैं जिनमें से २४ पाठ निजी रचना है और ११ पाठों में प्राचीन प्रसिद्ध ग्रन्थों से संग्रह किया गया है। प्रथम भाग के समान द्वितीय भाग की नवीन कृति में भी व्याकरण के एक एक उपादेय विषय को लेकर एक एक पाठ की रचना की गई है। किस पाठ में व्याकरण-सम्बन्धिनी क्या विशेषता है यह बात विषय-सूची के देखने से स्पष्ट हो जायगी। पुस्तक को रोचक बनाने के लिए उन सभी उपायों का अवलम्बन किया गया है जिनका प्रथम भाग में किया गया था।

आशा है यह भाग भी पाठकों का मनोरञ्जन करता हुआ उनके हृदय में संस्कृतभाषा और साहित्य के प्रति अनुराग उत्पन्न करेगा।

—रामदत्त भारद्वाज

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पाठों का वर्गीकरण

(१) गद्यांशे

वर्णनात्मकाः पाठाः —

विद्यालयः । सम्राट् । उद्धवं प्रति कृष्णस्य वचनम् ।
धनिनो निर्धनस्य वैलक्षण्यम् । वाराणसी आश्रमः ।

संवादात्मकाः पाठाः —

रावणविरूपाक्षयोरालापः । विनोदप्रमोदयोः संवादः ।
रोगिणि कैकसकयोः कथा ।

कथात्मकाः पाठाः —

उपमन्योर्गुरुभक्तिः । बुद्धेः प्रभावः । कथानां सहकाराऽऽस्वादः ।

ऐतिहासिकाः पाठाः —

युधिष्ठिरस्य राजसूयः । रामचरितम् । ययातिचरितम् ।

साहित्यिकौ पाठौ—

पद्यानां व्याख्याया आदर्शः । अन्तरालापः ।

न्यायसूत्रात्मकौ पाठौ—

षड्विंशतितमः सप्तविंशतितमश्च पाठः ।

नाटकम्—

दूतवाक्यम् ।

उपदेशात्मकाः पाठाः —

अतिथिसत्कारः । परिश्रमस्य माहात्म्यम् । सद्बालकाः किं कुर्वन्ति कारयन्ति च ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२) पद्यांशे

वर्णनात्मकाः पाठाः —

दानिनो महिमा । इन्द्रप्रस्थम । वर्षावर्णनम् । पम्पासरो-वर्णनम् ।

संवादात्मकाः पाठाः —

दशरथविश्वामित्रयोः संवादः यक्षयुधिष्ठिरसंवादः । रावणेन शूर्पणखाया आलापः ।

ऐतिहासिकौ पाठौ—

नलकथा । गोपालबालानां तालफलभक्षणम् ।

नीतिश्लोकाः संकीर्णपद्यानि च ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषय-सूची

क्रमः	पाठानां नामानि	व्याकरणे विषयाः	पृष्ठम्
१	विद्यालयः	भ्वादिष्वात्मनेपदिनः	१
२	रावण-विरूपाक्षयोरालापः	अदादिष्वात्मनेपदिनः	५
३	दानिनो महिमा	जुहोत्यादिचुराद्यन्तानामात्मनेपदिनः	९
४	अतिथि-सत्कारः	द्विकर्म्मकक्रियाः	१२
५	सम्राट्	कर्मकारकः	१६
६	नल-कथा	करणकारकः	१९
७	विनोदप्रमोदयोः संवादः	सम्प्रदानकारकः	२२
८	परिश्रमस्य माहात्म्यम्	अपादानकारकः	२६
९	उद्धवं प्रति कृष्णस्य वचनम्	सम्बन्धकारकः	२९
१०	धनिनो निर्धनस्य वैलक्षण्यम्	अधिकरणकारकः	३२
११	वाराणसी	अव्ययीभावः	३५
१२	रोगि-चिकित्सकयोः कथा	तत्पुरुषः	३७
१३	रावणेन शूर्पणखाया आलापः	कर्मधारयो द्विगुश्च	४१
१४	उपमन्योर्गुरुभक्तिः	द्वन्द्वः	४५
१५	बुद्धेःप्रभावः	बहुव्रीहिः	४९
१६	इन्द्रप्रस्थम्		५४
१७	युधिष्ठिरस्य राजसूयः	तारतम्यबोधकाः	५९
१८	सद्बालकाः किं कुर्वन्ति कारयन्ति च ?	प्रेरणार्थकप्रयोगाः	६३
१९	दशरथविश्वामित्रयोः संवादः		६६
२०	कन्यानां सहकाराऽऽस्वादः [१]	सन्नन्तप्रयोगाः	७०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रमः	पाठानां नामानि	व्याकरणे विषयाः	पृष्ठम्
२१	कन्यानां सहकाराऽऽस्वादः [२]	सन्नन्तप्रयोगाः	७३
२२	आश्रमः	कर्मवाच्यं भाववाच्यं च	७७
२३	पद्यानां व्याख्याया आदर्शः		८१
२४	अन्तरालापाः		८४
२५	नीतिश्लोकाः		८७
२६	न्यायाः (कहावतें)		९२
२७	सूक्तयः		९५
२८	गोपाल-बालानां तालफलभक्षणम्		९८
२९	राम-चरितम्		१०१
३०	महाभारते यक्ष-युधिष्ठिर-संवादः		१०६
३१	ययातिचरितम्		१०८
३२	रामायणे वर्षा वर्णनम्		१०९
३३	रामायणे पम्पासरोवर्णनम्		११०
३४	दूतवाक्यम्		१११
३५	सङ्कीर्णपद्यानि		११६
३६	शब्दकोषः		१२१

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh



श्रीरामचन्द्रस्याभिषेकः—पृ० १०४

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

प्रथमः पाठः

विद्यालयः

विद्यालयो वाण्या मूर्तिरिव विराजते। इहाऽनेकाः कक्षाः शोभन्ते यत्रान्तेवासिनो विविधान् विषयान् शिक्षन्ते।

अस्माकं पाठशालायां सर्व एव छात्राः स्वोन्नत्यै यतन्ते यतमानाश्च ते परिश्रमस्य फलं लभन्ते। ते गुरूणां वचांसि सावधानतया शृण्वन्ति तथैव च पुनः स्पष्टं भाषन्ते।

वर्षान्ते परीक्षा भवति यत्राध्यापकाश्छात्रान्परीक्षन्ते। यदा परीक्षायां विद्यार्थिनस्तिष्ठन्ति तदा अध्यापकास्तान्निरीक्षन्ते। बालाः सफलताया ईहन्ते ईहमानाश्च परस्परं स्पर्धमानाश्च त उन्नतेः पथि वर्धन्ते।

विद्यालयस्य निकट एवैकश्छात्रालयोऽपि वर्त्तते यत्राद्यत्वे विंशच्छात्राः सन्ति। कक्षासु पाठान् समाप्यात्राऽऽगत्य मीमांसन्ते कामयन्ते च यत् कक्षायामधीतः पाठः कण्ठस्थो भवेदिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

छात्रालये सायं प्रातरीश्वरं भजन्ते। भजमानाँश्च ताननुत्साहो नैव बाधते। यदि कष्टमापतति धीरतया तत् सहन्ते।

ये स्वं कार्यं सम्यक् कुर्वन्ति तान् गुरवः प्रशंसन्ति स्वजन्ते च। गुरुभ्यस्त एव रोचन्ते ये तान् सेवन्ते सेवमानाश्च विद्याया लाभाय कल्पन्ते।



यदि कश्चिदपराध्यति, विद्यालयस्य वा नियमानुल्लङ्घते तर्हि तमपराध्यन्तं नियमाँश्चोल्लङ्घमानं तं प्रधानाध्यापको दण्डयति। तस्मिन् समये दण्डयितुर्हस्ते वेत्रं वीक्ष्य बालाः वेपन्ते ताडिताश्च कम्पन्ते। वेपमानान्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कम्पमानाँश्च तान्गुरुः समादिशति "न वयं वो वृथा ताडयामः। वयं तु युष्माकं मङ्गलमेव कांक्षामहे।"

क्षमस्व भगवन्निति क्षमां याचमानान् माणवकान् गुरुः क्षमते।

ये छात्रा रुग्णा भवन्ति, खाद्यं वमन्ति, कासन्ते, ऽतीव वा टीकन्ते तान्वैद्यमहोदय आदिशति "न विगाहध्वं सरसि सरिति वा। न स्वदध्वं चिञ्चां मरिचं च। न श्रयध्वं तरुमूलं निशि। यदि मयोक्तं वच आलम्बिष्यध्वे नैरुज्यं तर्हि अचिरादेव लप्स्यध्वेऽन्यथा महार्घाणि रसायनान्यपि न वो त्रास्यन्ते।

चिकित्सकस्य भाषितमाश्रयमाणा बालकाः शीघ्रं स्वास्थ्यं लभन्ते।

अभ्यासः

धातुः	अर्थः	वर्तमाने	शानचि
१ राज्	to shine	राजते	राजमानः
२ शुभ्	to look beautiful	शोभते	शोभमानः
३ शिक्ष्	to learn	शिक्षते	शिक्षमाणः
४ यत्	to make effort	यतते	यतमानः
५ लभ्	to get	लभते	लभमानः
६ भाष्	to speak	भाषते	भाषमाणः
७ ईक्ष्	to see	ईक्षते	ईक्षमाणः
८ ईह्	to endeavour	ईहते	ईहमानः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

९ स्पृध्	to compete	स्पर्धते	स्पर्धमानः
१० वृध्	to grow	वर्धते	वर्धमानः
११ वृत्	to be	वर्तते	वर्तमानः
१२ मान्	to investigate to think over	मीमांसते	मीमांसमानः
१३ कम्	to desire	कामयते	कामयमानः
१४ भज्	to serve	भजते	भजमानः
१५ बाध्	to oppress	बाधते	बाधमानः
१६ सह्	to endure	सहते	सहमानः
१७ स्वज्	to embrace	स्वजते	स्वजमानः
१८ रुच्	to appear good	रोचते	रोचमाणः
१९ सेव्	to serve	सेवते	सेवमानः
२० कल्प्	to be able	कल्पते	कल्पमानः
२१ वेप्	to tremble	वेपते	वेपमानः
२२ कम्प्	to tremble	कम्पते	कम्पमानः
२३ कांक्ष्	to wish	कांक्षते	कांक्षमाणः
२४ याच्	to beg	याचते	याचमानः
२५ क्षम्	to pardon	क्षमते	क्षमाणः
२६ कास्	to cough	कासते	कासमानः
२७ टीक	to sneeze	टीकते	टीकमानः
२८ गाह	to swim	गाहते	गाहमानः
२९ स्वद्	to taste	स्वदते	स्वदमानः
३० श्रि	to depend upon	श्रयते	श्रयमाणः
३१ लम्ब	to hang down	लम्बते	लम्बमानः
३२ त्रै	to protect	त्रायते	त्रायमाणः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयः पाठः

रावण–विरूपाक्षयोरालापः

रावणः—(तारस्वरेण) कोऽत्राऽऽस्तेऽद्य द्वारि ?

विरूपाक्षः—(सभयं प्रविश्य) महाराज ! अहं मासे विरूपाक्षः हा ! महाराजस्यापकीर्तिः सर्वत्र प्रसरति ।

रावणः—किं ब्रूषे रे नीच । पुरतो दशाननस्य नेत्थं मघवाऽपि ब्रूते । दण्डयिष्यामि त्वामचिरादेव ।

विरूपाक्षः—(कम्पमानः) दण्डोऽयमेव मे करे । दण्डयाम्यनेन विडालान्महाराज, जम्बूकान् राजेश, खिंखिरान्देवराज ।

रावणः—न ब्रूष्व मां "देवराज" इति । नाहं देवानां राजा । देवराजस्य तस्य भीरोर्भीकरोहम् ।

विरूपाक्षः—भीरोर्भीकरो भीर्वा भीकरो भीरूणां सर्वेषां भीकरः । एवं भवन्तं वक्ष्ये ।

रावणः—कथमात्थ रे दुर्मते त्वमित्थम् । अहन्तु ब्रुवे "देवराजस्य भीरोर्भीकरः" । त्वं पुनर्ब्रूषे भीर्वोर्भीकर इति । कस्तेऽभिप्राय एवं ब्रुवाणस्य ?

विरूपाक्षः—(वेपते । चिन्तयति च कामपि वाचञ्चातुरीम्) आं महाराजराज ! भीरू तौ राम-लक्ष्मणौ । रामो नाम

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कोऽपि तापसस्तस्यानुजो लक्ष्मणोऽपि तथा । रामस्तु स एव यस्य पत्नीं भवानचोरयत् ।



रावणः—शेषे जागर्षि वा ? इन्द्रजितः पितुः पुरत आस्से । एव मासीनस्य वृथा जल्पतश्च किम्भवतीति जानासि न वा ? किम्भणसि ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विरूपाक्षः—नाऽहमेव भणामि नाथ, यदा भवानन्तःपुरं प्रविशति तदा सर्व एव पारिषदा एवं भणन्ति यल्लङ्केश्वरो रामस्य तापसस्य जायां वनान्ताद-चोरयत्।

रावणः—किं सत्यमेतत्। सर्वे मे सभ्या इत्थं ब्रुवते ? किं महोदरोऽप्येवं गदति ? किं क्षीणकर्णोऽप्येवं जल्पति ? किं भीमकायोऽप्येवं भाषते ?

विरूपाक्षः—(प्रणम्य) आस्तां शान्तो भवान् क्षणम्। सर्वे भवन्तं कलङ्कयन्ति। यद्यभयं मे स्यात्तर्हि वक्ष्येऽपर-मप्येकं रहस्यम्।

रावणः—अभयन्ते। ब्रूष्व सत्यम्।

विरूपाक्षः—महाराजस्यानुजो भीरूणां शिरोमणि र्विभी-षणोऽप्येवमेव भाषते।

रावणः—हुं ! पश्यामि मे भृत्या मित्राणि सम्बन्धिनश्च सर्वेप्येवं भणन्तो न लज्जन्ते। शयिष्यते सोऽपि ताभ्यां समं मृधे।

विरूपाक्षः—काभ्याम् सम्राट् ?

रावणः—रामेण लक्ष्मणेन च।

विरूपाक्षः—तौ तापसौ भीरू इति प्रागेवाहमुक्तवान्। विभीषणस्यापि भवन्भीकर इति सत्यमेव मयोक्तं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

'भीरूणां भीकरो भवानिति'। सत्यं ब्रुवाणस्य मे पदे भवान् वृद्धिं करोतु। गुणान् गास्यामि।

रावणो मुद्रामेकां मारकतीं विरूपाक्षस्य करे निधाय क्रुद्धया दृशा दिशः पश्यन् सभाया बहिर्निर्गतः।

प्रश्नोत्तराणि

१—अस्मिन् पाठे विशेषतया केषां धातूनां प्रयोगः?
(आस्, ब्रू, शी इति त्रयाणाम्।)

२—कस्य गणस्यैमे त्रयोऽपि?
(अदादिगणस्य।)

३—इमे परस्मैपदिनो वात्मनेपदिनो वा?
(आस् शी इति द्वा वात्मनेपदिनौ। तृतीयस्तूभयपदी।)

अभ्यासः (१)

धातुः	क्रियाणां रूपरेखा
आस्	आस्ते। आसीत। आस्ताम्।
	आस्त। आसिष्यते।
शी	शेते। शयीत। शेताम्।
	अशेत। शयिष्यते।
ब्रू (परस्मैपदे)	ब्रवीति। ब्रूयात्। ब्रवीतु।
	अब्रवीत्। वक्ष्यति।
(आत्मनेपदे)	ब्रूते। ब्रुवीत। ब्रूताम्।
	अब्रूत। वक्ष्यते।

अभ्यासः (२)

धातुः	शत्रन्तः प्रयोगः	शानजन्तः प्रयोगः
आस्		आसीनः (पु०) आसीना (स्त्री०)
शी		शयानः (पु०) शयाना (स्त्री०)
ब्रू	ब्रुवन् (पुँ०) ब्रुवती (स्त्री०)	ब्रुवाणः (पु०) ब्रुवाणा (स्त्री०)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तृतीयः पाठः

दानिनो महिमा

दानिनो ददते दानं दीनेभ्यो, दधते दयाम् ।
नराणामीदृशां कीर्त्ती राजते सर्वदा भुवि ॥१॥
हरिश्चन्द्रः समग्रं स्वं विप्रायाऽदत्त हर्षितः ।
अतएव यशोनाम सोऽधत्ताऽस्मिञ्जगत्तले ॥२॥
ददीताऽसूनपि प्राज्ञः क्षिप्रं जन्मभुवो हिते ।
निदधीत सुरक्षायां तस्याः स्वान्तञ्च मानवः ॥३॥
दत्तां भोः स्वं धनं पात्रे भवान् भीते क्षुधोदरात् ।
विधत्तां च तदेवेह यदादिशति सद्गुरुः ॥४॥
दास्यते धर्मकार्ये यो न्यायेनोपार्जितं वसु ।
तं धार्मिकं सदा लोका निधास्यन्ते स्वमूर्धसु ॥५॥
जायते कोऽपि लोकेस्मिन्विरलो गुणवान्नरः ।
यो मन्यते तृणायैव रिक्थं बहु मतं नृणाम् ॥६॥
गर्त्तेषु लीयते भूरि कृपणानां धनं भुवि ।
विद्यते केवलं तेषामकीर्त्तिरपि भूतले ॥७॥
कोऽजायतात्र दानी योऽददाद्वसु शुभेच्छया ।
नाऽविद्यत च तस्येह मानउन्नतिकारकः ॥८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कोशेषु चिन्वते सर्वे पुष्कलं हेम सर्वतः ।
दत्ते च कश्चनैकस्तु भेदं पश्यन्तु पण्डिताः ॥९॥
दानिनो महिमैवैष मानमाप्नोति जीवितः ।
मरिष्यति तदापीत्थं चेष्यते विपुलं यशः ॥१०॥
आद्रियन्ते जनाः सर्वे दानिनं गुणशालिनम् ।
वरं भवेदसौ मूर्खो बुद्ध्या विरहितोऽपि वा ॥११॥
भुञ्जते रुचिरान् केचिदाहारान् धनभोगिनः ।
दत्ते दानी तु सर्वस्वं परेषां हित-काम्यया ॥१२॥
कुर्वते धर्मकार्याणि लभन्ते तोषमात्मनः ।
जानते दानकर्मैव दानिनः कार्यमात्मनः ॥१३॥
अर्थयन्ते जना दीना दीनास्तान्धनलिप्सया ।
सर्वेषां कामनाः शीघ्रं पूरयन्ते तु दानिनः ॥१४॥

अभ्यासः

(१) आदितश्चतुर्थं पद्यं यावत् भाषानुवादं कुरुत ।
(२) पञ्चमतोऽष्टमं यावदन्वयं लिखत ।
(३) कस्यचिद् दानिनो नाम जानीथ चेन्निर्दिशत ।
(४) नवमतारभ्य द्वादशं छन्दो यावत्सन्धीन् विच्छिन्त ।

अस्मिन् पाठे प्रयुक्तानां धातूनां सूची—

धातुः		गणनाम	रूपरेखा
१ दा	to give	जुहोत्यादिः	दत्ते, अदत्त, ददीत, दत्ताम्, दास्यते ।
२ धा	to bear	,,	धत्ते, अधत्त, दधीत, धत्ताम्, धास्यते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

	वि+धा	to do		
	नि+धा	to put		
३	जन्	to be born	दिवादिः	जायते, अजायत, जायेत, जायताम्, जनिष्यते।
४	विद्	to be	„	विद्यते, विद्येत, विद्यताम्, अविद्यत, वेत्स्यते।
५	मन्	to know	„	मन्यते, मन्येत, मन्यताम्, अमन्यत, मंस्यते।
६	ली	to hide	„	लीयते, अलीयत, लीयताम्, लीयेत, लेष्यते।
७	चि	to collect	स्वादिः	चिनुते, चिनीत, चिनुताम्, अचिनुत, चेष्यते।
८	मृ	to die	तुदादिः	म्रियते, म्रियेत, म्रियताम्, अम्रियत, मरिष्यति।
९	आ+दृ	to honour	„	आद्रियते, आद्रियेत, आद्रियताम्, आद्रियत, आदरिष्यते।
१०	भुज्	to eat	रुधादिः	भुंक्ते, भुंजीत, भुंक्ताम् अभुंक्त, भोक्ष्यते।
११	कृ	to do	तनादिः	कुरुते, कुर्वीत, अकुरुत; कुरुताम्, करिष्यते।
१२	ज्ञा	to know	क्र्यादिः	जानीते, जानीत, जानीताम्, अजानीत, ज्ञास्यते।
१३	अर्थ	to beg	चुरादिः	अर्थयते, अर्थयेत, अर्थयताम्, आर्थयत, अर्थयिष्यते।
१४	पूर्	to fulfil	„	पूरयते, पूरयेत, पूरयताम्, अपूरयत, पूरयिष्यते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थः पाठः

अतिथि-सत्कारः

चन्द्रकान्ताया अम्बा सोमवारस्य सायंकाले स्वे सदने धेनुं दुग्धं दुहत्यासीत्। एतस्मिन्नन्तरे कश्चित् साधुस्तत्र समायातः, अवदच्च "धनहीनोऽहं क्षुधा-पीडितोऽम्ब त्वां भोजनं याचे।" अम्बा स्वपुत्रीं चन्द्रकान्तां वचनमिदमब्रवीत्, "इमम् साधुं कोष्ठं नय। देहि चास्मै किञ्चिद् भोजनं सादरम्"। कन्या महानसमगच्छदपश्यच्च शिक्यं भोजनाय, किन्तु तस्मिन्न किमप्यासीत्। अथ सा द्रुतमेव साधुं कोष्ठमनयत् अभणच्च "कृपया भवानत्रोपविशतु, आहरामि भवन्तं भोजनम्"।

ततः सा बुद्धिमती कन्या जननीमवदत् "अहं साधोर्भोजनाय तण्डुलानोदनं पक्ष्यामि"।

माता—महानसादानीय किञ्चित् तस्मै किं न ददासि ?

पुत्री—मातर्न जाने, क्व गतं पायसं यन्मध्याह्नभोजनादवशिष्टम्।

माता—नाऽस्ति किं तच्छिक्ये ?

पुत्री—नाऽम्ब। आखवः अस्मान् पायसं मुषित्वा खादितवन्त इति तर्कयामि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

माता—सत्यं ते वचः। इमानुन्दुरून् दण्डयिष्यामि। ईदृशाञ्जन्तून् मुद्रास्तु दण्डयितुं न शक्नोम्यत एवेमान् लौहजालमेव रोत्स्यामि।

पुत्री—किन्तावदधुना कार्य्यम्?

माता—अहं दुग्धं क्षीरं पचामि। त्वं दधि नवनीतं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मथान। आदिश च कुबेरं स्वमनुजम् "हारेभ्यो निष्कुटं प्रविश्य तरून् पुष्पाणि चिनुहि"।

पुत्री—एवमेव विदधामि (दधि मथित्वा पात्रे निदधाति)। (प्रसूनान्यादाय च कुबेरोऽपि प्रतिनिवृत्तः)

माता—वत्स कुबेर, त्वं गच्छ साधोः सकाशे। तेन सह संलप।

कुबेरः—बाढम् (गच्छति। साधुं च विलोक्य) प्रणमामि भवन्तम्।

साधुः—चिरं जीव वत्स। किं पठसि ?

कुबेरः—भोः गणितं भाषां च पठामि। भवन्तं प्रश्नमेकं पृच्छामि। भवान् कथमिमां दशामापन्नः।

साधुः—आसमहं पूर्वं धनाढ्यः। सत्कर्माणि कुर्वन्नेवाहमजीवम्। किन्तु द्यूते मेऽधिका प्रीतिरभवत्। एकदा सभिकस्य गेहे कितवा मां सर्वस्व मजयन्। ततो निर्धनताया निर्विण्णोऽहं स.धोर्वेशमगृह्णाम्। सम्प्रति शुद्धं जीवनं निर्वहामि, भिक्षां चरामि, भक्ताश्च मेऽनेके। तान्धर्मं शास्मि।

[महानसे क्षीरं सिद्धम्]

माता—पुत्रि स्थालीं कोष्ठं वोढुं समर्थाऽसि न वा ?

पुत्री—मातः स्थालीं कोष्ठं कर्ष्याम्येव, न हस्तेन वक्ष्यामि सुगमतया।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

[मातैव क्षीरं कोष्ठं नयति। साधुः खादति। ततश्च सर्वेभ्य आशीर्वादान् व्याहृत्य स वनं प्रति भजनाय गच्छति]

अभ्यासः

अधो लिखिता धातवो	द्विकर्मका	भवन्ति।
१ दुह्	to milk	अदादिगण
२ याच्	to beg	भ्वादि ,,
३ पच्	to cook	,,
४ दण्ड्	to punish	चुरादि ,,
५ रुध्	to obstruct	रुधादि ,,
६ प्रच्छ्	to ask	भ्वादि ,,
७ चि	to pluck	स्वादि ,,
८ ब्रू	to speak	अदादि ,,
९ शास्	to preach	,,
१० जि	to win	भ्वादि ,,
११ मथ्	to churn	त्रयादि ,,
१२ मुष्	to steal	,,
१३ नी	to carry	भ्वादि ,,
१४ (आ) हृ	to bring	,,
१५ कृष्	to Pull	,,
१६ वह्	to carry	,,

कठिनशब्दाः

कोष्ठः	room	कमरा
महानसम्	kitchen	चौका
शिक्यम्	net for hanging food	छींका
आखुः	mouse	चूहा
हारः	garland	माला
निष्कुटः	orchard	घर का बगीचा

सभिकः one who keeps a gambling house जुआ खिलानेवाला

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पर्यायाः

महानसम्,	रसवती,	पाकशाला,	सूदशाला।
द्रुतम्,	शीघ्रम्,	लघु,	क्षिप्रम्, आशु।
आखुः	मूषकः,	उन्दुरुः,	खनिकः, बिलेशयः।

पञ्चमः पाठः

सम्राट्

सम्राट् सिंहासनमधितिष्ठति। तमुभयतः सामन्ताः स्वानि स्वान्यासनान्यध्यासते। स देशस्य वृद्ध्यै सर्वथा यतते मन्त्रिणश्च पृथक् पृथक् कार्याणि विधातुमादिशति।

यदा सोऽश्वमारुह्य शत्रून्विजेतुं प्रचलति तदा सेनापतयोऽपि तमनुचरन्ति। स रिपूणां दलं स्वां च सेनामन्तरा निर्भयो भूत्वा तिष्ठति। आत्मानं चाऽभितः स्थितममित्रपक्षं निशितैः शरैर्हन्ति।

शत्रुभिः समं युद्धं कुर्वन्नयमनेकान्यहानि कदाचिच्च बहून्मासानपि विदेशेष्वेव वसति। कवचं शिरस्त्राणमायुधानि च बिभ्रत् एकस्मिन्नपि दिवसे क्रोशाननेकान्प्रयाति।

सम्राजं निकषा ये बुधा गच्छन्ति तानयं प्रीत्या सत्करोति। देशे विद्यालयाँश्चिकित्सालयानद्भुतालयाँश्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निर्माति यत्र क्रमशो विद्यार्थिनो विविधा विद्याः शिक्षन्ते, आतुरा नैरुज्यं लभन्ते, जनता च विचित्राणि वस्तूनि प्रेक्ष्य ज्ञानमुपार्जति। सम्राडमन्तरेण क एतादृशानुपायान् कुर्यात्।



स राजधानीं परितः परिखां रचयति येन रिपवो दुर्गं न प्रविशेयुः। सर्वतो राष्ट्रं चरान् नियुनक्ति ये गुप्तान्समाचारान्विज्ञाय तस्मै निवेदयन्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इतिहासे वयं पठामो यत्पुरा भारते बहवः सम्राज आसन्ये प्रजाः पुत्रानिवाऽरक्षन् ।

यः प्रजानां मनस्सु पितेव सम्यग् राजते स एव सम्राडिति विद्वांसो वदन्ति ।

धिक्तान् ये धर्मेण शासितारमपि सम्राजं वृथैव निन्दन्ति ॥

अभ्यासः

कठिनशब्दाः

१ उभयतः	on both sides	दोनों ओर
२ अनु	after	पीछे
३ अन्तरा	between	बीच में
४ अभितः	on both sides	दोनों तरफ़
५ निकटा	near	निकट
६ अन्तरेण	without	बिना
७ परितः	around	चारों ओर
८ सर्वतः	on all sides	सब ओर
९ धिक्	woe!	धिक्कार, लानत
१० चिकित्सालयः	hospital	अस्पताल
११ अद्भुतालयः	museum	अजायबघर
१२ शिरस्त्राणम्	helmet	टोप
१३ आतुराः	patients	बीमार
१४ नैरुज्यम्	health	स्वास्थ्य
१५ परिखा	ditch	खाई

वाक्यपूरणम्

१ सः शत्रुसेनाम् आत्मसेनां च—निर्भयो भूत्वा तिष्ठति ।

२ सम्राट् राजधानीम्—परिखां रचयति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३ राजा सर्वतः—चरान् नियुनक्ति।
४ धिक्—ये राजानम्—।

प्रश्नोत्तराणि—

१ सम्राट् किमधितिष्ठति ?
(सिंहासनम्।)
२ राजा शत्रून् कैर्हन्ति ?
(निशितैः शरैः।)
३ स परिखां किमर्थं रचयति ?
(येन शत्रवो दुर्गं न विशेयुः।)

षष्ठः पाठः

नल-कथा

पुराऽस्मिन्भारते वर्षे राजाऽसीद् धर्मतत्परः।
नाम्ना नल इति ख्यातो रूपवान् गुणवान्बली ॥१॥
प्रकृत्या चारु रासोत्स वाजिविद्याविशारदः।
दमयन्ती च तस्यासीत्पत्नी गुणगणैर्युता ॥२॥
यमपश्यन्नलो राजा काण मक्ष्णा परन्तपः।
कर्णेन वधिरं चैव तस्यासीत्स सहायकः ॥३॥
जटाभि स्तापसं वापि यं स साधुममन्यत।
व्यदधाद् भूरिशस्तस्य स सपर्यां महात्मनः ॥४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एकदा सोऽनुजेनैव सार्धं सम्राडरिन्दमः ।
अक्षैरदीव्यद् भूपालो, द्यूते तु विजितोऽभवत् ॥५॥
अथाऽनुजेन सर्वस्वं हृतं वीक्ष्य महामनाः ।
प्राविशद् विपिनं घोरं वन्यजन्तु-प्रपूरितम् ॥६॥
पत्नी पतिव्रता तस्य दमयन्तीति विश्रुता ।
तमन्वगच्छद् धर्मेण तस्मिन् घोरेऽपि कानने ॥७॥
अहोभिः कैश्चनाथेमा वाप्नुतां राजदम्पती ।
तद्वनस्य परं पारं राजमार्गं तदा श्रितौ ॥८॥
अङ्गुल्याऽथाऽऽदिशद् भूपो दमयन्तीपितुःपुरीम् ।
"गच्छ स्वपितरं साध्वि त्यक्त्वा मा" मित्यभाषत ॥९॥
"गच्छेयं रहिता भर्त्रा क्वाहमत्यन्तमल्पधीः" ।
इत्थं प्रत्यब्रवीद् राज्ञी चक्षुर्भ्यामश्रु बिभ्रती ॥१०॥
स्वपन्तीन्ताम्महाराज्ञीं त्यक्त्वा भीरुं भयावहे ।
अरण्ये निर्दयो भूपो यथेच्छं व्यचरद् भुवि ॥११॥
प्रतिबुध्याऽथ सा दीना व्यलपच्चारुलोचना ।
पतिनिर्दिष्टमार्गेण ह्यगच्छत् पितुरन्तिके ॥१२॥
नलोऽपि विचरन्राज्ञा ऋतुपर्णेन शासितम् ।
देशं प्राप्तस्ततश्चायं तस्य सारथ्यमाप्तवान् ॥१३॥
दमयन्ती पतिप्राणा चरैर्विश्वासभूमिभिः ।
अज्ञानाद् भर्तृदासत्वं वाष्पव्याकुललोचना ॥१४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दमयन्त्याः पिता चाथो विदर्भाणामधीश्वरः ।
कौशलेन समाहूय नलं प्राप्तोत्पराम्मुदम् ॥१५॥

अथ राजा नलो भूयो दमयन्त्या सुसङ्गतः ।
श्वशुरेण धनैरश्वैर्वस्त्रैर्भूयोभिरर्चितः ॥१६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तदा गत्वाऽथ स्वं देशमाह्वयत्पुष्करं "प्रिय ।
पुनर्द्यूयाव" इत्युक्त्वा, सोऽवदद् "द्यूतमस्तु नौ" ॥१७॥
तस्मिन्काले नलो राजा जितवान्भ्रातरं द्रुतम् ।
ऋतुपर्ण - महाराज-दत्त - विद्या - प्रभावतः ॥१८॥
अथ प्रजानां हितकृन्नलो राज्ये प्रतिष्ठितः ।
अशात् ताश्च यथापूर्वं दमयन्तीमनोरमः ॥१९॥
नल-प्रसङ्ग-व्याजेन सुकुमारधियां कृते ।
करणस्य मया केचिद् दृष्टान्ता इह दर्शिताः ॥२०॥

अभ्यासः

(१) आदितश्चतुर्णां पद्यानां सन्धीन् वियोजय ।
(२) पञ्चदशाद्यष्टान्तानां श्लोकानामन्वयं लिख ।
(३) नवमत आरभ्य द्वादशं यावत् पद्यानां भाषार्थं वद ।
(४) ततश्चतुर्णां छन्दसा माङ्गलभाषायामनुवादं कुरु ।
(५) अवशिष्टानां श्लोकानां सन्दर्भान् विवृणु ।

सप्तमः पाठः

विनोद-प्रमोदयोः संवादः

श्रावण-मासस्य त्रयोदश्यां तिथौ रविवासरे पूर्वाह्णे विनोदकुमारः शाकाय विपणिं गच्छन्नासीत्, पुरतः समायान्तं प्रमोदकुमारं वीक्ष्य तमब्रवीत् ।

"वन्दे प्रमोद । सुप्रभातम् ।"

प्रमोदः—मित्र विनोद, सुप्रभातम्, नमस्तुभ्यम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विनोदः—अपि कुशली भवान् ?

प्रमोदः—अस्मि । धन्यवादाः । क्व गच्छसीदानीम् ?

विनोदः—वास्तुकाय तदर्थं वेसवाराय च पण्य-वीथिकां व्रजामि । त्वं पुनः कुत्र प्रस्थितः ?

प्रमोदः—अहं तावद् दूरं गमिष्यामि । धेनोरन्वेष-णाय प्रस्थितोऽस्मि ।



विनोदः—धेनोः ? न युष्माकं गृहे कापि गौः । अन्वेषणं पुनस्तस्याः कीदृशम् ?

प्रमोदः—क्रेष्याम्येकाम् ।

विनोदः—आम् । ज्ञातम्मया । गोर्दुग्धं ते रोचते । गोपालश्च महिषीदुग्धमानयति ।

प्रमोदः—न दुग्धपानाय गां क्रेष्यामि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विनोदः—किमर्थं तर्हि ?

प्रमोदः—कथयामि रहस्यम्। माता मे एकं स्वप्नमपश्यत्—

विनोदः—कीदृशं स्वप्नम्। उत्पद्यते मे मनसि कुतूहलम्। वद विस्तरशः।

प्रमोदः—कश्चित्तपोनिष्ठो विप्रस्तामभाषत "भाग्ये ते वृद्धिर्भविष्यति गामेकां मह्यं दास्यसि चेत्। माता च दास्यामीति तस्मै प्रत्यशृणोत्।"

विनोदः—ततस्ततः।

प्रमोदः—ततोम्बा जागरित्वा गामेकां कस्मैचिद् विप्राय दातुमैच्छत्। माश्वाऽदिशद् "वत्स ग्रामाय गत्वाऽन्वेषयैकां पयस्विनीं गाम् सवत्साम्।"

विनोदः—वरं सखे, जानामि, तदर्थं त्वं व्रजसि। कियत्यो मुद्रास्ते सकाशे ?

प्रमोदः—"पञ्चविंशतये मुद्राभ्यो धेनुं क्रीणीही"ति जनन्याऽऽज्ञप्तोऽस्मि।

विनोदः—कीदृशाय विप्राय तवाम्बा तां गां दास्यति। जानाम्येकं योग्यं ब्राह्मणम्।

प्रमोदः—कथय तद्गुणान्।

विनोदः—सरितस्तटे कुटीरं निर्माय तस्मिन्स निवसति। कस्मा अपि प्राणिने न क्रुध्यति, न द्रुह्यति, नेर्ष्यति,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नचाऽसूयति। दयादिगुणेभ्य एव स सदा स्पृहयति। कथय जनन्यै "सर्वथा योग्योऽसौ ब्राह्मणः।" तपश्चरन् स धनानि तु तृणाय मन्यते। यदाऽहं तद्दर्शनाय गच्छामि नमामि च तं, तदा स 'स्वस्ति तेऽस्तु' इति मधुरं वचो वक्ति। सायं प्रातश्च स पावके 'देवेभ्यः स्वाहा' इति वदन् सर्पिर्जुहोति।

प्रमोदः—यद्येवं तर्हि ममाम्बा तस्मा अवश्यमेव श्लाघिष्यते। अतिवर्त्तते वेला। गच्छाम्यधुना। नमस्ते।

विनोदोऽपि तं नमस्कृत्य स्वं गृहमागतः।

कठिनशब्दाः

सुप्रभातम्	good morning	प्रातःकाल
वास्तुकम्	a vegetable	बथुआ
वेसवारः	spice	मसाला
महिषी	she-buffalo	भैंस
प्रत्यश्रौषीत्	promised	वायदा किया
पयस्विनी	milch cow	दुधारू गौ
ईर्ष्या	jealousy	हसद, परोन्नतिदय की असहिष्णुता
असूया	finding fault with other's merits	गुणों में दोषदर्शन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अष्टमः पाठः

परिश्रमस्य माहात्म्यम्

कस्मिँश्चित्पत्तन एकोऽलसश्छात्रः प्रतिवसति स्म। असावध्ययनात् पराङ्मुखो भूत्वेतस्ततो निर्बुद्धिभिर्बालकैः समं विहरति स्म।

यदा माता तं घण्टापथे क्रीडन्तं समाह्वयत् 'वत्स गच्छ विद्यालयम्', तदाऽसौ तस्या अपि न्यलीयत। यथाकथञ्चन पाठशालां प्रेषितोऽपि तत्राऽध्यापकेभ्योऽबिभेत्तथा ततश्चाप्यपद्रवति स्म।

एकदाऽध्ययने परिश्रमाद् भीतः स गेहाद् बहिर्निरगच्छत्, भ्रमँश्चेतस्ततो ग्रामाद् दक्षिणा निर्गतः। मध्याह्ने बुभुक्षयाऽऽकुलो भूत्वा श्रान्तः सन्नेकस्मिन् कूपे निषण्णः। कूपादारादेव घनच्छायो रसालतरुरासीत्। स फलान्यत्तु मैच्छत् किन्तु तस्माद् रसालविटपिनोऽन्यः कोऽपि वृक्षस्तत्र नाऽऽसीत्।

आम्राणां लिप्सया स तं तरुमारोहत् परन्तु तस्य शाखासु मञ्जरयोऽपि नाऽऽसन्, का कथा सहकाराणाम्, यतस्तदानीं फाल्गुनात् पूर्वो माघमास आसीत्। निराशयो-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्विग्नचित्तस्य तस्य हस्तः स्खलितस्तरोश्चाऽसौ भूम्याम-वापतत्।

अथ क्षणेन छायायां विश्रम्य जठरस्यानलं शमयितुं पुनश्चङ्क्रमितुमारभत। प्राक् कूपात् क्रोशार्धे क्षेत्रमेकं सोऽपश्यत् तत्र च यवेभ्यो गां वारयन्तीमेकां स्त्रियम्। तामवलोक्य स स्वे स्वान्तेऽचिन्तयद्यदियमङ्गना मध्याह्न-भास्करस्य तापमविगणय्य कीदृशं श्रममाचरति। श्रमेणैव कार्याणि सिध्यन्ति। तस्मादृते, मनोरथैः न स्वल्पमपि कर्म भवति। अहमपि श्रममेव कुर्वाणो विद्यां लप्स्ये।

इत्थं मनस्याकलय्य स स्वगृहमेव प्रस्थितः। तज्जन-न्यपि तस्यागमनं प्रतीक्षमाणा सोपानमार्गेण हर्म्यतल-मारुह्यातिष्ठत्। अपराह्णे सा हर्म्यपृष्ठाद् प्रैक्षत धूलिमलि-नाम्बरं क्षामं स्वतनयम्।

सोऽपि गृहं मौनं प्रविश्य लज्जमानः क्वचित्कोणे न्यषीदत्। माता स्नेहेन तं समुपागम्य तमभणत्, किं मत् जिह्रेषि? मया विना का तव भोजनं प्रभन्स्यति?

अश्रूणां धाराभिर्नयने विलिम्पन वाष्पगद्गदकण्ठोऽसौ तदा स्वां प्रसूमित्थमब्रवीत्—"हे जननि, ज्ञातं मया परिश्रमस्य माहात्म्यम्। सम्प्रति मनोनियोगेन कार्यं करिष्यामि। तव विचारेभ्यः पृथङ् न मे विचारा भविष्यन्ति।"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ परिश्रमेण विद्यामभ्यस्यन्नसौ बालकः पञ्चवर्षानन्तरं गुरोरावश्यकविद्यां प्राप्य ततश्च धनं प्रचुरमुपार्ज्य ससुखम् जीवनं निरवहत् ।

कठिनशब्दाः

पत्तनम्	town	नगर
घण्टापथः	road	सड़क
लिप्सा	desire to possess	पाने की इच्छा
प्राक्	towards east	पूर्व में
अङ्गना	woman	स्त्री
स्वान्तम्	mind	चित्त
ऋते	without	बिना
आरात्	near (far)	निकट (दूर)
सोपानम्	staircase	ज़ीना
हर्म्यम्	mansion	हवेली
अम्बरम्	cloth	वस्त्र
मौनम्	silently	चुपचाप
बाष्पः	tear	आँसू
गद्गदः	choked	रुंधा हुआ
प्रसूः	mother	माता
पृथक्	different	जुदा, अलग

अभ्यासः

अस्मिन्पाठे सङ्गतानां क्रियापदानां सूचीमेकां लिख यथा [१] प्रतिवसति स्म, [२] विहरत स्म, [३] आह्वयत् इत्यादि ।

अन्यामेकां सूचीं लिख यत्र अव्ययपदानि स्युः यथा [१] इतस्ततः, [२] यदा, [३] अपि, [४] यथा कथञ्चन, [५] तथा, [६] ततः इत्यादि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नवमः पाठः

उद्धवं प्रति कृष्णस्य वचनम्

अयि सुहृदां श्रेष्ठ, न ते ऽविदितास्त्येतद्यदहं पश्यतां दर्शकानां चाणूरं मुष्टिकं तथा तयोरीशं कंसं लीलयैवाऽहनम् ।

अमुञ्चञ्चाहं पितरौ देवकीं वसुदेवं च कारागारात् । अथ ताभ्यामाज्ञप्तोऽहमव्रजमुज्जयिनीम् शिक्षायै । हायनमेकं तत्रोषित्वाऽनेनैव च स्वल्पेनाऽनेहसा सर्वा विद्या अधीत्य गुरोराश्रमादू ह्य एव प्रतिनिवृत्तोऽस्मि ।

त्वामहं यदत्राऽद्भुतं तन्नाकारणम् । त्वामहं किमपि सन्दिश्य वृन्दावनं प्रेषयितुमभिलषामि ।

अहं मातुर्यशोदाया भृशं स्मरामि या मा स्वेङ्के निधाय मम वदनं पश्यन्ती कदापि नाऽतृप्यत्, या मह्यं बलदं नवनीत मयच्छद्यदशित्वैवाहं दुराचारपरायणस्य कंसस्य वधाय अलम् अभवम् ।

अहं मातरं यशोदां तस्या वात्सल्यस्य हेतोरेवेत्थं स्मरामि । राज्ञां मतोऽपि विदुषां पूजितोऽपि, धनिनां सत्कृतोऽपि, गुणिनां संस्तुतोऽपि वृन्दावनवासिनीं पयः-पायिनीमम्बां न विस्मरामि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



"गच्छ मित्र तमेव प्रदेशं यत्राऽहं शैशवेऽरिक्षम् ।"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तस्या गीतं कथमहं विस्मरेयम् यत्सा मां तोषयितुं काले काले गायति स्म। न तस्या स्तुल्या काऽपि माता भुवि भूता भविष्यति च।

सम्राजो मातामहस्योग्रसेनस्य पुरुषा मामहर्निशं परिचरन्ति किन्तु मे मनसि तदेव वृन्दाविपिनं विराजते यत्राम्बाऽहः पञ्चकृत्वः क्षीरं दधि हैयङ्गवीनं तक्रं पायसं च मे परेण प्रेम्णा प्रयच्छति स्म।

गच्छ मित्र तमेव प्रदेशं यत्राऽहं शैशवे ऽरिङ्गम्, पौगण्डे वत्सैरक्रीडम्, कैशोरे च नानाकेलीररचयम्। पश्य मेऽम्बाम्, कच्चित्सा तत्र कुशलिनी।

जानास्येव पन्थानं यो वृन्दावनं याति। इतः खलु मथुरापुर्याः पश्चिमोत्तरेणाऽऽस्ते सा मे लीलाभूमिः।

प्रश्नोत्तराणि

(१) कृष्णः कस्य पुत्रः ?
देवक्या वसुदेवस्य च। यशोदा नन्दश्च तमपालयताम्।

(२) कंसः कोऽभवत् किमर्थं च तं कृष्णोऽहन् ?
असौ देवक्या अग्रज आसीत्। गा विप्रान् मुनीश्च नृशमतुदत्, अतः श्रीकृष्णस्तं न्यगृह्णात्।

(३) कृष्णस्य गुरुः काऽवसत् किं च तस्य नाम।
असा वुज्जयिन्यां वसति स्म। नाम चाऽमुष्य सान्दीपनिः।

(४) कः सम्राडुग्रसेनः ?
उग्रसेनः कंसस्य देवक्याश्च जनकः। कंसवधानन्तरं स एव मथुराया राज्यासनमध्यतिष्ठत्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(५) कत्रास्ति मथुरा ?
इन्द्रप्रस्थनगरादष्टाशीति क्रोशाधस्ताद्दक्षिणेन यमुनायास्तटे।

कठिनशब्दाः

वृन्दा=तुलसी
पंचकृत्वः=पांच बार
पौगण्डम्=शैशव और कैशोर के बीच की अवस्था
केलिः=क्रीडा
हैयङ्गवीनम्=मक्खन

दशमः पाठः

धनिनो निर्धनस्य वैलक्षण्यम्

१—धनी पर्यङ्के शेते। शिरसोऽधस्तादुपधानं निदधाति। नीशारेणात्मानं शिशिरे समाच्छादयति। महार्घान्पटान्गात्रे परिदधाति।

किन्तु दरिद्रः कटे शेते। मूर्ध्नोऽधो बाहुमेवोपबर्हस्य स्थान उपयुनक्ति। पटच्चरेणात्मानं हेमन्ते समावृणोति। जीर्णां कन्थां शरीरे परिधत्ते।

२—उदिते भास्वति सेवकाः सधनं परिचरन्ति, प्रातराशमाहरन्ति। श्रुत्वा चासौ धनिकः पर्यङ्कादधोऽवतरति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

किन्तु निर्धनः सूर्येऽनुदित एव जागर्त्ति। शौचाचारान्समाप्य केवलं पानीयमाचामति।

३—मध्यं गते सवितरि द्रव्यवान्पुरुषः षड्रससम्पन्नानि बहूनि खाद्यानि भुंक्ते। ततश्च सुखं दीर्घं विश्राम्यति।



किन्तु द्रव्यहीनो मध्याह्ने समुपस्थिते रोटिकासु लवणमेव निधाय जलस्य सहायतया तासां कवलान्निगिरति। ततश्च परिश्रमे व्यापृता भवति।

४—दुर्भिक्षेऽन्नमन्वेषयन्तीषु प्रजासु धनाढ्या निर्भय-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्तिष्ठति किन्तु निस्स्वः कातरया दृशा दशापि दिशो विलोकयति ।

५—गुणैर्विहीनमपि द्रव्यवन्तं नरं गुणिषु श्रेष्ठ इति सर्वे मन्यन्ते, किन्तु गुणानां गणैरपि विभूषितं निर्द्रव्यं पुमांसं नृषु हीनः इति ब्रुवन्ति जनाः ।

६—भद्रेष्वपि मानुषेषु असाधुभावमाचरन् लक्षाधीशः प्रशंसामेव भजते, किन्तु विभवविरहितस्तु अभद्रेष्वपि साधुभावं दधन्निन्दामेव लभते ।

७—वातायनैर्विलसितेषु गवाक्षैर्विभूषितेषु गगनचुम्बिषु सौधेषु वित्तवन्तो निवसन्ति यत्र न झञ्झायाः प्रकोपो, न रवेररेरिव कराणामाक्रमणम्, न च घनात्पतन्तीनां पृषतामेव दरः, किन्तु निर्वित्ताः पर्णैर्विहितासु कुटीष्वेव कालं यापयन्ति यत्र प्रभञ्जनस्त्वचम्भिनत्तीव, विवस्वान् सदनान्निर्वासयतीव, आपश्चासारै रुजं प्रसारयन्तीव ।

कठिनशब्दाः

१	उपधानम्	pillow	तकिया
२	कटः	mat	चटाई
३	पटच्चरम्	torn cloth	फटा कपड़ा
४	कन्था	beggar's robe	भिक्षु का वस्त्र
५	निस्स्वः	poor	दरिद्र
६	प्रशंसा	praise	तारीफ़
७	वातायनम्	window	खिड़की
८	गवाक्षः	window	झरोखा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

९	झंझा	storm	आँधी (मेहसहित)
१०	पृषत्	drop of water	बूँद
११	प्रभञ्जनः	wind	तेज़ हवा
१२	विवस्वान्	sun	सूर्य
१३	आसारः	torrent	धारा

पर्यायाः

(१) कटः । आस्तरणम् ।
(२) प्रभञ्जनः । वातः । पवनः ।
(३) विवस्वान् । भास्वान् । सप्ताश्वः । उष्णरश्मिः ।

एकादशः पाठः

वाराणसी

वाराणसी नगरी भारतस्य प्रसिद्धासु पूर्व्वैकतमाऽऽस्ते । पुरीयमनुगङ्गं विलसति । अत्र विद्याया महती चर्चा विद्यते । प्राचीनकाले बहवो विद्वांसः संस्कृतभाषाया धुरंधरा इमामलमकुर्वत । अद्यत्वेऽपि तेषामेव पद्धतौ यथाशक्ति चलन्तः शतशो विपश्चितो मण्डयन्त्येनाम् ।

पुरीमध्ये विश्वनाथो भगवाञ्छङ्करो विराजते यं दर्शका नाना प्रदेशेभ्यः समायान्ति । त उपशिवमुपविश्य वैदिकैर्मन्त्रैः स्तुवन्ति, गङ्गायाश्च पावनैरम्बुभिस्तम् प्रतिदिनमभिषिञ्चन्ति । यद् ज्ञानं परोक्षं भवति विबुधानां तदपि प्रत्यक्षं भवति बुधानां श्रीशंकरस्य प्रसादेन ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

काश्यां कौशेय-पट्टस्य व्यवसायः प्रचुरतया भवति। रमण्यो मनोऽनुरूपं काश्याः कौशेयीः शाटिकाः परिधाय महान्तं मोदमावहन्ति।



विश्वविद्यालयः

मालवीयमहोदयेन स्थापितो विश्वविद्यालयोऽत्र दर्शनीयः। विद्यालयोऽयं छात्राणां हितं निर्विघ्नं विधत्त इति न पाठकानामविदितम्।

गङ्गायाश्छटा काश्यामतीव मनोरमा। सा प्रेक्षकाणां चक्षूंषि प्रसभमाकर्षतीव।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सिद्धार्थो बुद्धत्वं प्राप्य, स्वाञ्छिष्यान्यत्र प्रथमम्-मुपदेशमशात् तत्सारनाथस्थानं काश्याः समीप एव वर्तते।

अभ्यासः

अलंकुरुते	adorns
पद्धतिः	foot steps
विपश्चित्	learned
व्यवसायः	industry
उप्तः (वप्+क्त)	sown
प्रेक्षकः	spectator
प्रसभम्	forcibly

अव्ययीभावसमासः

रूपस्य	योग्यम्	इति	अनुरूपम्
विघ्नस्य	अभावः	इति	निर्विघ्नम्
दिने दिने	"	इति	प्रतिदिनम्
अक्षि	प्रति	इति	प्रत्यक्षम्
अक्ष्णः	परम्	इति	परोक्षम्
शिवस्य	समीपे	इति	उपशिवम्
शक्तिम्	अनतिक्रम्य	इति	यथाशक्ति

गङ्गाया दैर्घ्यस्य सदृशेन दैर्घ्यं यस्येति—अनुगङ्गम्

द्वादशः पाठः

रोगि-चिकित्सकयोः कथा

कर्णपुरे जीवनदत्तो नाम वैद्यवरश्चिकित्सायाः कार्यमनुतिष्ठति। पीयूषमस्य पाणावास्त इति खलु तं सर्वे नराः प्रशंसन्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तस्मिन्नेव नगरे चन्द्रबलपाण्डेयो राजकीयोद्याने निरीक्षकपदमध्यास्ते। तस्यात्मजः सूर्यबलपाण्डेयो ज्वरेणार्दितः सन्नेकदा भृशं क्रन्दितुमारभत। अथ चन्द्रबलस्तमात्मना समं जीवनदत्तस्योषधालयमनयत्।

चन्द्रबलः—वैद्यमहोदय, कष्ट-पतितोऽस्मि। भवदाश्रितोऽहम्। पुत्रो मे दुःखापन्नोऽस्ति। किं कुर्याम्? भवानेव मे शरणम्।

जीवनदत्तः—(सूर्यबलस्य नाडीं परीक्षमाणः) अरे अस्य नाडी हंस इव चलति। नूनमयं चक्रमर्दान्दृढबीजाँश्चाऽखादत्। ज्वरोऽप्यस्त्यस्येदानीम्। एतत्सदृश एवायमपि रोगी वर्त्तते (निर्दिशत्यङ्गुल्याऽपरमेकं पुरुषम्) औषधंददे।

सूर्यबलः—कीदृशमिदमौषधम्? तिक्तं मधुरं वा? तिक्तं न पातुं शक्नोमि।

चन्द्रबलः—कियन्मूल्यमौषधस्य?

जीवनदत्तः—केवलं पादोनं रूप्यकम्। श्व एव रोगो लयमेष्यति! वाक्-कलहं त्यज। शयनीये सुखं शेष्व। गुडं गुडमिश्रमन्यद्वा किमपि न भुंक्ष्व। मरिचादीनि न सेव्यान्यपथ्यानि। औषधमिदं सेवस्व (औषधं ददाति)।

सूर्यबलः—प्रातर्मां क्षुद् बाधते। किमद्याम् श्वः?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दध्नो घोलं चषकमितं तुषारसहितं भुंजीय ? स तु निदाघे हित एव ।

जीवनदत्तः—यद्येवमाचरिष्यसि चरकः सुश्रुतो वाग्भटो वा तव जीवनायालं न भविष्यति क्वाहं सामान्यो वैद्यः (क्रोधमभिनयति) ।

चन्द्रबलः—क्षमताम्भवानस्योक्तम् । नायं किञ्चिद-पथ्यमश्नीयादेवमेव प्रभन्त्स्यामि ।

जीवनदत्तः—आम् । मृत्युभैषज्यं मे सकाशे नास्ति । यदा चास्यामयः शमं व्रजति, स्वेद आयाति, शरीरेऽयं लाघवमनुभवति, तदा स्वल्पं दुग्धौदनं खादितुं शक्नोति । एवं कृते न रोगभयम् । न च सुखापेतोऽयं भविष्यति ।

अथ सूर्यबलः पित्रा सार्धं स्वं गृहमागतः । गृहागतश्च संयमेनोषधमसेवत । वैद्यवचांसि स्मरन स पूर्वाह्णे, मध्याह्ने सायाह्ने, च त्रिरह्नो मधुना चूर्णं लीढ्वा स्वस्थोऽभवत्त्रिभि-रेव दिवसैः । ततश्च दुग्धमोदनं चाश्नात् तदनन्तरं सुपक्वानि फलानि सेवमानो बलमप्यलभत ।

पुनश्चैकदा वैद्यमहोदयः सूर्यबलमेवमुपादिशत् । शाकान् यथेच्छं भुंक्ष्व । अहमपि शाकवैद्यः । अतएव सदैव स्वास्थ्यमनुभवामि । हितं मितं च खाद । अमेध्यमाहा-रन्तु दूरत एव त्यज । सरसिजं सेवतो मल्लिका वा यत्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विकसन्ति तत्रोपवनेषु नित्यं भ्रम, तत्रैव च कुटीरवास-मुरीकुरु ।

वैद्येनादिष्टमनुसरन् सूर्यबलो बलम्बहु लब्ध्वा मेधावी बुद्धिमाँश्च सञ्जातः ।

अभ्यासः

द्वितीया-तत्पुरुषः

कष्टम्	पतितः	इति	कष्ट-पतितः ।
भवन्तम्	आश्रितः	इति	भवदाश्रितः ।
दुःखम्	आपन्नः	इति	दुःखापन्नः ।

तृतीया-तत्पुरुषः

एतेन	सदृशः	इति	एतत्सदृशः ।
पादेन	ऊनम्	इति	पादोनम् ।
वाचा	कलहः	इति	वाक्कलहः ।
गुडेन	मिश्रम्	इति	गुडमिश्रम् ।
चषकेन	मितः	इति	चषकमितः ।
तुषारेण	सहितः	इति	तुषारसहितः ।

चतुर्थी-तत्पुरुषः

मृत्यवे	भैषज्यम्	इति	मृत्युभैषज्यम् ।

पंचमी-तत्पुरुषः

रोगात्	भयम्	इति	रोगभयम् ।
सुखात्	अपेतः	इति	सुखापेतः ।

षष्ठी-तत्पुरुषः

वैद्यस्य	वचांसि	इति	वैद्यवचांसि ।
अह्नः	पूर्वः	इति	पूर्वाह्णः ।

सप्तमी-तत्पुरुषः

कुटीरे	वासः	इति	कुटीरवासः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नञ्-तत्पुरुषः

न मेध्यः इति अमेध्यः ।

अलुक्-तत्पुरुषः

सरसि जातम् इति सरसिजम् ।

मध्यमपदलोपी-तत्पुरुषः

शाक + प्रिय + वैद्यः इति शाकवैद्यः ।

त्रयोदशः पाठः

रावणेन शूर्पणखाया आलापः

शूर्पणखा—लङ्केश ! संपश्यसि नृत्यमित्थं
शृणोषि गीतानि मनोहराणि
जानासि न त्वं तव शत्रुरेको
नरर्षभो वांछति ते विरोधम् ॥१॥

रावणः—विजित्य सर्वानमरानिहाहं
विलासलीला रचयामि नित्यम् ।
उपास्व मां पश्य च मे प्रभुत्वं
गृहाण हस्ते सितपद्ममेतत् ॥२॥

अशान संयाव मथो धयाम्बु
तुषारमत्रैव च लीढि मद्यम् ।
न किंनृपोऽहं दयनीयभाग्यः
प्राश्नामि पीयूषमपोतमन्यैः ॥३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्व त्वं स्वसा मेऽटसि काननेषु
संसत्सु राजस्व हि रावणस्य ।
प्रेक्षस्व नृत्यन्त्विह मेनकायाः
समागता या सदनान्मघोनः ॥४॥

शूर्पणखा—धिक् त्वा मरे योऽमर-राज-राज्य-
जयेन दृप्तो न विलोकसेऽरिम् ।
यस्याऽनुजोऽकृन्तदिमां सुनासां
कर्णाविमौ मे रुचिरौ तथैव ॥५॥

रावणः—किं वक्षि ? नासा तव चारुकर्णौ
गता क्व नष्टौ कथमास्यतस्ते ।
रक्तेन लिप्तं वदनं तवेदं
न रोचते मे नसया विहीनम् ॥६॥
कोऽयं वद त्वं यमवासमन्
गन्तुं निधत्ते हृदये विचारम् ?
किं ब्राह्मणोऽसौ तव रूप-हारी ?
अब्राह्मणो वा कथयाऽत्र तूर्णम् ॥७॥

शूर्पणखाः—शृणु भ्रातर्ममेदानीं वचः सत्यं ब्रवीमि यत्
अस्ति पञ्चवटी नाम स्थानमुत्तरतस्त्वितः ॥८॥
वसतो दाशरथी तत्र सुन्दरौ परमाद्भुतौ ।
नीलो रामस्तयोः कामदेवादधिकरोचनः
अनुजो गोरवर्णश्च लक्ष्मणश्चारुलक्षणः ॥९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एका ताभ्यां सहैवास्ति साध्वी स्त्री रामवल्लभा।
रामेण च समो वीरो न भवेद्वै चतुर्युगे ॥१०॥



रावणः—श्रुतमेतत्त्वयोक्तं यत्, किन्तु पृच्छामि शोभने।
किमर्थं त्वं गता तत्र द्वारात् प्रासादभूमितः?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शूर्पणखा—खरदूषणयो राज्ये भ्रमन्ती स्वैरमम्बरे।
तावपश्यं नभस्थाऽहं शराँश्चापौ च बिभ्रतौ॥१२॥
भ्रातः शृणु त्रिभुवने पुरुषा अनेके
देवास्तथा मुनिजना ऋषयश्च यक्षाः।
किन्त्वस्ति तेषु नहि कश्चन तत्समोऽपि
रूपे बले गुणगणेष्वधिकः कुतः स्यात् ॥१३॥

रावणः—अलम्भगिनि तच्छंसाकरणेन, व्रजाम्यहम्।
मातुलं रथमास्थाय वैरन्ते प्रतिशोधितुम् ॥१४॥
आहराम्यद्य रामस्य प्रियां पत्नीं पतिव्रताम्।
प्रयुंक्ष्व त्रिव्रणे स्वे त्वं सुषेणोक्तं च भेषजम्॥१५॥

अभ्यासः

कर्मधारयः

नरः	ऋषभ	इव	इति	नरर्षभः
सितं च	तत्	पद्मम्	इति	सितपद्मम्
कुत्सितः	नृपः		इति	किंनृपः
चारु च	तौ	कर्णौ	इति	चारु-कर्णौ
कामः च	असौ	देवः	इति	कामदेवः

द्विगुः

पंचानां	वटानां	समाहार	इति	पंचवटी।
चतुर्णां	युगानां	समाहार	इति	चतुर्युगम्।
त्रयाणां	भुवनानां	समाहार	इति	त्रिभुवनम्।
त्रयाणां	व्रणानां	समाहार	इति	त्रिव्रणम्।

कठिनशब्दार्थाः

स्वैरम्	vagrantly	(adv)	यथेच्छ
अम्बरम्	sky	(n. neu)	आकाश

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भगिनी	sister	(n. fem)	बहिन
स्वसा	"	"	"
प्रासादः	palace	(n. mas)	महल
दाशरथिः	Dasharatha's son	(adj)	दशरथ का पुत्र
तूर्णम्	soon	(adv)	शीघ्र
रुचिरः	beautiful	(adj)	सुन्दर
तुषारः	iced	(adj)	बर्फ़ पड़ा हुआ।

कथाप्रसङ्गाः Allusions

१—मघवा इन्द्रः। स च देवानां राजा। अमरावत्यां वसति।
२—मेनका अप्सराः स्वर्गस्य। देवानां विनोदाय नृत्यति।
३—कामदेवः सौन्दर्यस्याधिष्ठाता देवः। इन्द्रस्य सहायकः।
४—सुषेणो रावणस्य राजवैद्य आसीत्। अस्यैवाज्ञया मारुतिः संजीवनीं लक्ष्मणाय हिमवत आनयत्।

चतुर्दशः पाठः

उपमन्योर्गुरुभक्तिः

पुरा धौम्यो नाम महर्षिस्तपोनिरतः शिष्याञ्छास्त्राणि शास्ति स्म। तस्याश्रमो विशालो जनपदाद्दूर आसीत्। महर्षेः कुटीरं निकषा प्लक्षन्यग्रोधमासीत्तस्य चाधस्ताद् गवाश्वं तृणमचरत्। शाद्वलेषु यदा कदाचिदहिनकुलं परस्परमयुध्यत येन बटूनां मनस्सु महानानन्दः समजायत।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एकदोपमन्योर्मातापितरौ धौम्यमभिगम्यावदतां यदावयोरयंबालकोऽत्रभवतो विद्यां लब्धुमिह वत्स्यति कृपया स्वीकरोतु भवानेनम् ।

महर्षि 'स्तथे' त्युक्त्वा बालमुपमन्युं स्वे विद्यालयेऽरक्षत् । तस्य पितरौ च स्वं नगरं न्यवर्त्तेताम् ।

उपमन्युर्मेधावी परिश्रमी गुरुभक्तश्चाऽऽसीत् । गुरुपत्नी तस्य भोजनाय सात्त्विकमाहारं यवान् दधिघृतम् फलानि शाकाँश्चायच्छत् । यथानियमं स छत्रोपानहमनुपयुज्यैव गुरोर्धेनूरन्वगच्छद् गोमयं चैकत्र कुरुते स्म । प्रातः सायं च द्यावाभूमी जनयन्तं देवं पवित्रैर्मन्त्रैरस्तौत् ।

गुरुरेकदाऽन्तेवासिनं पर्य्यैक्षत । सोऽवदद् वत्स किमश्नासि हृष्टपुष्टोऽसीति । शिष्यः प्रत्यवदत् । गुरो ! कदाचिन्माता भाजनं मे यच्छति कदाचिच्च भिक्षयोदरपूरणं विदध इति ।

गुरुः—यद् भिक्षायां लभसे तन्ममाऽनुज्ञाया ऋते न भुञ्जीथाः ।

उपमन्युः—अत्र भवत आदेशमनुसरिष्यामि । अथ प्रत्यहमुपमन्युना समर्पितं भिक्षान्नं गुरुरगृह्णात् ।

एकमासानन्तरं धौम्य उपमन्युं पुष्टमेव वीक्ष्य पुनरपृच्छद् वत्साद्यत्वे किं भुंक्षे । स सविनयं प्रत्यवदत्प्रथमं भिक्षान्नं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भवते समर्प्य पुनर्भिक्षित्वाश्नामीति। तदा गुरुर्बालकं द्विर्भिक्षाया अटनादपि न्यवारयत्।

अथ द्वितीयमासानन्तरं पुनर्गुरुरुपमन्युं पीनं विलोक्यापृच्छद्वत्स किं सम्प्रति खादसीति। गवां पयः पीत्वा जीवनं निर्वहामीति बालकः सादरं प्रत्यब्रवीत्।

तच्छ्रुत्वा धौम्य आदिशत्, "न म आज्ञां बिना मम धेनूनान्दुग्धं पातुमर्हसि"। अथ बालकः पयः-पानमप्यत्यजत्।

तृतीय मासानन्तरमप्युपमन्युं बलवन्तं दृष्ट्वा धौम्योऽपृच्छद्वत्स किमधुनाऽश्नासीति। सोऽपि प्रणम्य प्रत्यवदत् "गुरुवर्य्य, मातॄणां स्तनेभ्यः क्षीरं धयित्वा विरमतां वत्सानां वक्त्रेभ्यो ये फेनाः पतन्ति तानेव जग्ध्वाऽहं क्षुधाशान्तिमाचरामि।

त्वयि दयमाना अमी वत्सा स्वांशेभ्य एवाधिकान्फेनाँस्त्यजन्तीति मन्येऽतोऽपरेषां भागं हरमाणस्त्वमिमामपि वृत्तिं परिहरेति गुरुणाऽऽज्ञप्त उपमन्युस्तथेत्युक्त्वा तमप्याहारमत्यजत्।

अथैकदा वने गा अनुचरन् बुभुक्षया भृशमर्दितः सन सोऽर्क-पत्राण्यादत् तत्प्रभावाच्च स नेत्राभ्यामन्धो भूत्वा पथि कूप एकस्मिन्नेवापतत्।

अस्तङ्गते रवौ किन्तूपमन्यावनिवृत्ते सति धौम्यस्तं मार्गयितुमाश्रमान्निर्गत्य गोचरभूमिं प्राप्तस्तत्र च "वत्स ३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उपमन्यो ३ क्वांसि" इति मुहुरुच्चैराह्वयत्। गुरोर्वाणीं परिचित्य कूपाभ्यन्तरादेवोपमन्युः प्रत्यब्रवीत्। "अयमहमस्मि कूपे"। अथ गुरुस्तं कूपादुद्धृत्य देवानां चिकित्सकाभ्यां तस्य चिकित्सां विधाय वरमदत्त वेदज्ञानां श्रेष्ठस्त्वं भविष्यसीति।

अभ्यासः

द्वन्द्व समासः

१	प्लक्षः च	न्यग्रोधः च	प्लक्षन्यग्रोधम्
२	गावः च	अश्वाः च	गवाश्वम्
३	अहिः च	नकुलः च	अहिनकुलम्
४	माता च	पिता च	मातापितरौ
५	माता च	पिता च	पितरौ
६	दधि च	घृतं च	दधिघृतम्
७	छत्रं च	उपानहौ च	छत्रोपानहम्
८	द्यौः च	भूमिः च	द्यावाभूमी

प्रश्नोत्तराणि

१ सात्विक आहारः कीदृशो भवति? येनायुः सत्वं बलमारोग्यं सुखं प्रीतिश्च वर्धन्ते।

२ गुरोः किं नामाऽऽसीत्?
धौम्यः।

३ शिष्यस्य च किं नाम?
उपमन्युः।

४ देवानां चिकित्सकौ कौ?
अश्विनीकुमारौ।

५ अर्कपत्राणां प्रभावः कीदृशो भवति? अत्युष्णो भवति। जग्धानि च तानि जठरे दाहं कुर्वन्ते नयनयोश्च तीव्रां पीडाम्।

अस्याः कथायाः सारांशं स्वशब्देषु संस्कृतभाषायामेव लिखत।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पञ्चदशः पाठः

बुद्धेः प्रभावः

काचनाऽजा स्वां ग्रीवामितस्तत आन्दोलयन्ती शनैः शनैः शष्पानि भक्षयन्ती तिमिराच्छन्नां बहुलान्धकारां द्विप-व्याघ्रगोमाय्वीहामृगादिवन्यजन्तुभिः सङ्कुलामरण्यानीं प्राप्ता। किञ्चित्कालानन्तरं सा गर्जतां तेषां हुंकृतान्य-शृणोत्। तान्याकर्ण्य सा किङ्कर्त्तव्यविमूढाऽभवत्। व्यमृशच्च "मदीये मूर्ध्नि सम्प्रति कालो नृत्यन्नस्ति। म्रियमाणा सती राम-नाम स्मरन्ती किं न कञ्चनोपायमवलम्बेय"।

इत्थं ध्यात्वा धैर्यमवलम्ब्य प्रत्युत्पन्नमतिः सा सर्वत आत्मानं प्रैक्षत। दैवात् पञ्चास्यस्यैकस्य पदानां लक्ष्माणि तस्या नयनपथमापतितानि। ततः सत्वरं तस्या मनसि प्रत्यग्रैका युक्तिरुदैत्। द्रुतं च स्वं स्वल्पं बालधि-मितस्ततश्चालयन्ती निर्भया भूत्वा तेषु हर्यक्षाङ्घ्रि-चिह्नेष्वतिष्ठत्।

तदानीं सा सानन्दचित्ता ऽऽसीत्। एतस्मिन्नन्तरे धूर्तराजः फेरुरेकः समायात्। पीनाञ्चाऽजां निःशङ्कं तत्र विराजमानां वीक्ष्य किमपि चेतसि विचार्य स्वं भाग्यं प्रशंसन्नब्रवीत्—"कुतोऽद्येहाजे"। सा क्षिप्रं साध्वसं विहाय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यब्रवीत्—"आकर्णय" यस्याऽहं चरणचिह्नेष्वत्र स्थिताऽस्मि, स "यावदहं नायामि तावत्त्वमिह तिष्ठेति" मामादिश्याऽऽहाराऽन्वेषणाय काऽपि गतोऽस्ति ।

तच्छ्रुत्वा केसरिणश्च पदानामङ्कान् परिचित्य जातवेपथुर्भूत्वा स भूरिमायः क्षमां याचित्वा स्वावासं शनकैः प्राद्रवत् । गत्वा च व्याघ्रचित्रकावजां निकषा गन्तुमुपादिशत् । एकैकशस्तावपि समायातौ किन्तु निरुपायौ सन्तौ न्यवर्त्तेतामेव ।

अथैकः कण्ठोरवो भयङ्करदर्शनः स्वं पुच्छमुभयतः सरोषं क्षिपँस्तत्रागतः । अजा सानन्दैव तः स्थिता । तामेवं निर्भीकां विलोक्य साश्चर्यः पञ्चाननस्तामपृच्छत्त्वमिह कथं स्थिताऽसीति ।

सदैन्यं सविनयं च सा छगलिका प्रत्यब्रवीत्—"महाराज शरणं प्रपन्नाऽस्मि भवतः पदानामङ्कान् । न मेऽत्र किमपि भयम् । अकुतोभयसञ्चारा सत्यहमिह तिष्ठामि । अनेके जन्तवो मां जग्धुकामा इहायन् परं भवदङ्घ्रिलक्ष्माणि वीक्ष्य यथागतं गताः" ।

पुण्डरीकोऽसौ स्व-चरणानामीदृशमुदग्रं प्रभावं निशम्य प्रसन्नचेताः सञ्जातोऽदयत चाऽजायाम् । अब्रूत—"क्षधिताऽसि ? अत्स्यसि किम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

छगलिकाऽभणत् "यदि रोचते श्रीमते"।

सिंहस्तूर्णं करिणमेकमाह्वयद् दीर्घकलेवरं समादिशच्च तमित्थम्—"स्वं पृष्ठमेनामजामारोप्य हरितपत्रान् स्निग्धच्छायान् कोमलदलाननोकहान्गच्छ। तथा कुरु यथैषा कष्टं नानुभवेत्"।



अजा हृष्टमनस्का मृगाशनं प्रणम्य कुञ्जरपृष्ठासनासीना, आनन्दमनुभवन्ती कोमलानि पर्णानि यथेच्छं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भुञ्जाना भरितजठरा गजमादिशद्गच्छेदानीं ममकृते पानीयमादातुमिति ।

तथेत्युक्त्वा गजे पानीयमादातुं कासारं प्रति प्रस्थिते सति, साऽजा मन्दं मन्दं तरूणां छायायामुपसर्पन्ती स्वं ग्रामं गता ।

अहोभाग्यमजायाश्चातुर्यञ्च ।

अभ्यासः

कठिनशब्दार्थाः

१	शष्पम्	grass	दूब, घास
२	बहुलः	much	अधिक
३	द्विपः	elephant	हाथी
४	गोमायुः	jackal	गीदड़
५	अरण्यानी	dense forest	बड़ा घना वन
६	हुंकृतम्	soarat	गर्जन
७	किंकर्त्तव्यविमूढा	atwit's end	परेशान
८	पंचास्यः	lion	सिंह
९	लक्ष्य	mark	निशान
१०	प्रत्यग्रा	new	नवीन
११	बालधिः	tail	पूँछ
१२	हर्यक्षः	lion	शेर
१३	वेपथुः	tremor	कम्प
१४	कलेवरम्	body	शरीर
१५	अंघ्रिः	foot	पैर

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पर्यायाः

१	गोमायुः	सृगालः	शृगालः	फेरुः	भूरिमायः।
२	सिंहः	केसरी	कण्ठीरवः	पुण्डरीकः	पंचास्यः मृगाशनः।
३	गजः	कुञ्जरः	करी	नागः	वारणः।
४	अजः	छागः		छगलकः	बस्तः।

समासाः

१	बहुलः अन्धकारः यस्यां सा	=	बहुलान्धकारा
२	प्रत्युत्पन्ना मतिः यस्याः सा	=	प्रत्युत्पन्नमतिः
३	निर्गतं भयं यस्याः सा	=	निर्भया
४	सानन्दं चित्तं यस्याः सा	=	सानन्दचित्ता
५	निर्गतः उपायः ययोः तौ	=	निरुपायौ
६	भयङ्करं दर्शनं यस्य सः	=	भयङ्करदर्शनः
७	आनन्देन सह वर्तते इति	=	सानन्दा
८	निर्गता भीः यस्याः सा	=	निर्भीका
९	आश्चर्येण सह वर्त्तते इति	=	साश्चर्यः
१०	प्रसन्नं चेतः यस्य सः	=	प्रसन्नचेताः
११	दीर्घं कलेवरं यस्य सः	=	दीर्घकलेवरः
१२	हरितानि पत्राणि येषां ते	=	हरितपत्राः
१३	स्निग्धा छाया येषां ते	=	स्निग्धच्छायाः
१४	कोमलाः दलाः येषां ते	=	कोमलदलाः
१५	हृष्टं मनः यस्याः सा	=	हृष्टमनस्का
१६	भरितं जठरं यस्याः सा	=	भरितजठरा

—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

षोडशः पाठः

इन्द्रप्रस्थम्

इन्द्रप्रस्थं पुरं रम्यं
राजते यमुना-तटे ।
यत् पुरा पाण्डु-पुत्रेण
निर्म्मितं सत्यवादिना ॥१॥

अत्राऽभवन् महाराजा
देश्या वैदेशिकास्तथा ।
येऽकुर्वन् विविधान् कोटान
दुर्गान्यायतनानि च ॥२॥

प्रस्तर-स्तम्भ एकोऽत्र
पाली-वाणी-विभूषितः ।
तनोति विमलां कीर्त्तिं
भूपस्य प्रियदर्शिनः ॥३॥

अन्यश्च खण्डितप्रायः
सदैन्यमवतिष्ठते ।
दुर्मना निज-भाग्य-श्री-
रहितः पुरुषो यथा ॥४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लौह-तम्भोऽत्र चन्द्रस्य
महाराजस्य वर्त्तते ।



इन्द्रप्रस्थस्य लौहस्तम्भः

योऽराजद् ध्वज-रूपेण
विष्णोर्विष्णु-गिरौ पुरा ॥५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पृथ्वीराजोऽत्र चौहानः
सुखं संयोगिता-पतिः ।
अवसत परया ऋद्ध्या
बलवाञ्छत्रु-सूदनः ॥६॥

अस्य भूपस्य साम्राज्ये
कीलं सुशिथिलं ह्यभूत् ।
पुरस्याऽथाऽस्य सञ्जातं
नाम "ढिल्ली" सहैतुकम् ॥७॥

अकरोत् स्व-यशः-स्तम्भ-
निर्म्माणञ्चायमेकतः ।
यत् काल-कुटिल-भ्रूभि-
र्यवनेन समापितम् ॥८॥

कुतुबुद्दीन-नामा च
गौरी - चरण - सेवकः ।
पृथ्वीराज - समारब्धं
स्तम्भं निर्म्मातुमैहत ॥९॥

"कुतुब् की लाट्" इत्येतन्
नाम तस्य प्रसिद्धिभाक् ।
यद् दर्शकाः समायान्ति
नरा दिग्भ्यः पृथक् पृथक् ॥१०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अलाउद्दीन - भूपोऽत्र
पुरीमेकामकल्पयत् ।
ग़यासुद्दीन - राजश्च
तुग़्लकाबादमास्थितः ॥११॥

मुहम्मदश्च तत्सूनु-
रादिलाबादमैहत ।
ततो 'दीनपनाहं' च
शेरशाहोऽकरोत्तथा ॥१२॥

फ़ीरोजशाह - भूपोऽत्र
निरमाच्चैक - कोटकम् ।
योऽद्याऽपि च विभातीह
पुष्करिण्या विभूषितः ॥१३॥

कालमारभ्य पाण्डूनां
नगरीयं पुनः पुनः ।
वासिता स्थापिता किन्तु
भ्रंशं याता मुहुर्मुहुः ॥१४॥

मुगलसाम्राज्य - नेतॄणां
श्रेष्ठः शाहजहाँभिधः ।
अशाच्चेमां पुरीं दीर्घं
स्व-कृतं दुर्गमास्थितः ॥१५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अद्यत्वे चांग्लदेशीयैः
स्थापिता नूतना पुरी ।
याऽतिशेते प्रभावेण
सर्वा अन्याः पुरीरिह ॥१६॥

आपणैर्भूषिता अत्र
नाना - व्यापार-सङ्कुलैः ।
विविधा दर्शनाऽर्हाश्च
शोभन्ते पण्यवीथिकाः ॥१७॥

प्रासादाः सन्ति नैकेऽत्र
सुधया धवलीकृताः ।
ये राकासु विशोभन्ते
रजतेनेव निर्म्मिताः ॥१८॥

अन्यानि विविधानीह
सुस्थानानि चकासति ।
आत्मानं मन्यते धन्यं
यानि लोको विलोक्य वै ॥१९॥

अभ्यासः

१ आदितः पंचानां पद्यानामन्वयं लिख ।
२ षष्ठमारभ्य दशमं यावच्छन्दसामर्थां मातृभाषया लेख्यः ।
३ एकादशमारभ्य पंचदशं यावच्छ्लोकानां संधीश्छिन्धि ।
४ ततः पंचानां पद्यानामाङ्ग्लभाषायामनुवादं कुरु ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सप्तदशः पाठः

युधिष्ठिरस्य राजसूयः

पाण्डवानां युधिष्ठिरो ज्येष्ठः सहदेवश्च कनिष्ठ आसीत्। युधिष्ठिराद् भीमसेनो यवीयान् भीमसेनाच्च कनीयानर्जुन आसीत्। सहदेवान्नकुलो ज्यायानभवत्। इत्थं पञ्चापि पाण्डोस्तनया युधिष्ठिरो भीमार्जुनौ नकुलसहदेवौ चैकदा राजसूयाह्वयं यज्ञमनुष्ठातुं निश्चितवन्तः।

यः सर्वस्या एव भुवः शासकान् विजयते स एव राजसूयं यज्ञमाहर्तुमर्हतीति सङ्कल्प्य ज्येष्ठेन भ्रात्राऽऽज्ञप्ताः सर्वे यवीयांसो दूरान् दवीयसो दविष्ठांश्च देशान्विजेतुं प्रयाताः।

भीमः प्राचीं सहदेवोऽवाचीं नकुलः प्रतीचीमर्जुनश्चोदीचीं दिशं गतः। चत्वारोऽपि बलिष्ठाः क्षेपिष्ठा रणविद्यायां पटुतमा आसन्। अतस्ते सर्वानपि भूमिपान् करदानकुर्वत। ये तु राजानः पाण्डवानां सुहृद आसंस्ते विनैव जन्यं तेषामाधिपत्यममन्यन्त।

प्रचुरमुपायनराशिमादाय युधिष्ठिरस्य राजसूयं सर्वे सामन्ताः समुपागताः। धर्म्मराजश्च सर्वानपि यथोचितं सत्कृत्य तेषां वासाय पृथक् पृथक् प्रासादान् प्रावध्नात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सकला अपि राजगेहा राजोचितया सामग्र्याऽलंकृताः सरोभि-
रच्छादैर्विभूषिता नानाविधैस्तरुभिः परिवृताश्चासन ।



युधिष्ठिरस्यानुज्ञया कार्यकर्त्तारः स्वं स्वं कर्म कर्त्तु-
मारभन्त । दुःशासनः खाद्यानि वस्तूनि निरैक्षत । अश्वत्थामा
विप्रानसेवत । संजया राज्ञां शुश्रूषां व्यदधात् । दुर्योधन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आगन्तुकेभ्य उपहारानगृह्णात्। कृपाचार्यो रत्नान्यरक्षत्। वासुदेवश्च ब्राह्मणानां चरणानक्षालयत्।

राजसूयस्य विधिर्यथानियमं पालितः। अथ भीष्मो युधिष्ठिरमब्रवीदस्मिन्यज्ञे श्रेष्ठं पुरुषं समर्चयेति। युधिष्ठिरोऽपृच्छत् "कोऽयाऽस्यां संसदि वरिष्ठः"?

गांगेयोऽवदत् श्रीकृष्णोऽः पूज्यतमोऽस्ति यतः स एव गुरूणां गरिष्ठो, युधि स्थेष्ठो, जीवमात्रस्य प्रेष्ठः, क्षोदिष्ठेषु ह्रसिष्ठेष्वपि च कृपालुतमो, भक्तानां नेदिष्ठोऽविदुषां दविष्ठो विद्वत्तमो वसिष्ठो वशिष्ठश्च।

अथ सहदेवो यथारीति प्रथमं कृष्णमेवाऽपूजयत् यज्ञश्च समाप्तः।

अभ्यासः

(१) अधोलिखितानां शब्दानां लिङ्गानि ब्रूहि—
राजसूय भक्त विद्वस् गेह।
देश प्रासाद सः उदीची।
वास विधि संसत् रत्न।

(२) अधोनिर्दिष्टानां शब्दानां वचनं ब्रूहि—
अस्ति चरणान् गांगेयः सुहृदः।
आसन् ज्येष्ठेन विद्यायाम् दिशम्।

(३) सन्धि-विच्छेदं कुरु—
समर्चयेति। युधिष्ठिरोऽपृच्छत्। कोऽयाऽस्याम्।
विधिर्यथा। प्रचुरमुपायनम्। यज्ञश्च।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(४) अधस्तनपंक्तीः सावधानं स्मर

मूलावस्था	उत्तरावस्था	उत्तमावस्था
वृद्धः	ज्यायान्	ज्येष्ठः
वृद्धा	ज्यायसी	ज्येष्ठा
वृद्धम्	ज्यायः	ज्येष्ठम्
युवा	यवीयान्	यविष्ठः
युवा	कनीयान्	कनिष्ठः
दूरः	दवीयान्	दविष्ठः
बली	बलीयान्	बलिष्ठः
क्षिप्रः	क्षेपीयान्	क्षेपिष्ठः
प्रशस्यः	श्रेयान्	श्रेष्ठः
उरुः	वरीयान्	वरिष्ठः
गुरुः	गरीयान्	गरिष्ठः
प्रियः	प्रेयान्	प्रेष्ठः
क्षुद्रः	क्षोदीयान्	क्षोदिष्ठः
ह्रस्वः	ह्रसीयान्	ह्रसिष्ठः
अन्तिकः	नेदीयान्	नेदिष्ठः
वसुमान्	वसीयान्	वसिष्ठः
वशी	वशीयान्	वशिष्ठः
पटुः	पटुतरः	पटुतमः
पटुः पटुवी	पटुतरा	पटुतमा
पटु	पटुतरम्	पटुतमम्
विद्वान्	विद्वत्तरः	विद्वत्तमः
पूज्यः	पूज्यतरः	पूज्यतमः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अष्टादशः पाठः

सद्बालकाः किं कुर्वन्ति कारयन्ति च ?

सद्बालकाः सदा गुरूणामाज्ञां पालयन्ति । अमून्ये शिक्षका अध्यापयन्ति तेषां चरणेष्वमी नित्यं प्रणामाञ्जलीनर्पयन्ति । विवाहाद्युत्सवेषु गुरून् विनम्रैः सेवकैराहाययन्ति । तेऽप्याहूताः सन्तः शिष्याणामुदवसितानि सहर्षमलंकुर्वन्ति । कृपया समागताँस्ताञ्छिष्या वरासनेषूपवेशयन्ति । स्थापयन्ति च तेषां पुरत एलास्ताम्बूलानि पूगीफलोपेतानि । सुमनसस्तान् सुमनांसि सुगन्धीनि घ्रापयन्ति । दर्शयन्ति च रुचिराणि वस्तूनि स्वगृहाणाम् । इत्थं सत्कृता जातानुरागाश्च गुरवस्तान् सत्कर्तॄन् प्रेम्णा पाठयन्ति लेखयन्ति शिक्षयन्ति च नीतिवाक्यानि ।

सद्बालका यवीयसः सहचरान्न कदापि भीषयन्ते न च वृथैव तान् विस्मायय न्ति । गृहारामेषु कुसुमव्रततीर्मनोरमा इष्टकानामालवालेषु तरुषु रोपयन्ति । तेषां मकरन्दं पातुं गंधं च घ्रातुं यदि पतङ्गास्तत्राऽऽपतन्ति न तान् निवारयन्ति । स्वयमपि समये समये हारेभ्यः पुष्पाणि चिन्वन्ति मित्रैरपि च चाययन्ति .

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सद्बालका विवस्वदुदयात्प्रागेव जाग्रति निश्चिते च काले निशि स्वपन्ति। भोजनानन्तरं स्वयमपि किञ्चिच्छेरते शाययन्ति च स्वानुजान् विश्रामाय, किन्तु न स्वपन्ति स्वापयन्ति च। वीराग्रणीनां जीवनीरधीत्य, कालिदासादिसत्कवीनां कविताः श्रुत्वा श्रावयित्वा, लोकोपयोगिकार्याणि कृत्वा कारयित्वा, निबन्धान् लिखित्वा लेखयित्वा, रामायणादीन् सद्ग्रन्थान्पठित्वा पाठयित्वा च कालं यापयन्ति। स्वयं व्यासादिभिर्महर्षिभिर्दर्शिते पथि गच्छन्ति गमयन्ति च मित्राणि। सर्वदा शुभानेव विचारान् हृत्सु भावयन्ति, नाशयितुं चेहन्तेऽन्येषां पीडाः।

ये सद्बालका ये वा तेषामनुकर्त्तारस्ते सर्वे यौवनवार्धकयोर्जीवनं सानन्दं निर्वाहयन्ति।

अभ्यासः

धातुः	साधारणरूपम्	प्रेरणार्थकरूपम्
१ पाल्	पालयति	पालयति
२ अधि+इ	अधीते	अध्यापयति
३ आ+ह्वे	आह्वयति	आह्वाययति
४ उप+विश्	उपविशति	उपवेशयति
५ स्था	तिष्ठति	स्थापयति
६ घ्रा	जिघ्रति	घ्रापयति
७ दृश्	पश्यति	दर्शयति
८ पठ्	पठति	पाठयति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

९	लिख्	लिखति	लेखयति
१०	शिक्ष्	शिक्षते	शिक्षयति
११	भी	बिभेति	भीषयते
१२	वि+स्मि	विस्मयते	विस्मापयति
१३	रुह्	रोहति	रोहयति। रोपयति
१४	नि+वृ	निवृणोति	निवारयति
१५	ची	चिनोति	चाययति
१६	शी	शेते	शाययति
१७	स्वप्	स्वपिति	स्वापयति
१८	श्रु	शृणोति	श्रावयति
१९	कृ	करोति	कारयति
२०	या	याति	यापयति
२१	गम्	गच्छति	गमयति
२२	भू	भवति	भावयति
२३	नश्	नश्यति	नाशयति
२४	निः+वह्	निर्वहति	निर्वाहयति

प्रकृतिप्रत्ययान्दर्शय

अधीत्य। कृत्वा। अध्यापयन्ति। निर्वहन्ति

सन्धीन् वियोजय

महर्षिः। ईहन्तेऽन्येषाम्। जीवनीरधीत्य। चरणेष्वमी

विग्रहान् वद

रामायणादीन्। व्यासादिभिः। वीराग्रणीनाम्

समासानां नामानि भण

महर्षिः। प्रणताञ्जलीन्। सत्कवीनाम्

कठिनशब्दार्थाः

१	उदवसितम्	house	घर
२	वरासनम्	good seat	बैठने की अच्छी जगह

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३	पूगीफलम्	betel-nut	सुपारी
४	सुमनाः	(adj.) generous-minded	अच्छे मनवाला
५	सुमनः	(n. neut.) flower	पुष्प
६	आरामः	orchard	बगीचा
७	पतंगः	butterfly	तितली
८	व्रततिः	creeper	बेल

नवदशः पाठः

दशरथविश्वामित्रयोः संवादः

उपविष्टाय तस्मै स विश्वामित्राय धीमते ।
पाद्यमर्घ्यं च गां चैव भूयो भूयो न्यवेदयत् ॥१॥
अर्चयित्वा तु विधिवद् विश्वामित्रमभाषत ।
प्राञ्जलिः प्रयतो वाक्यमिदं प्रीतमना नृपः ॥२॥
यथाऽमृतस्य संप्राप्तिर्यथा वर्षमवर्षके ।
यथाऽन्धस्येक्षणप्राप्तिर्भवदागमनं तथा ॥३॥
यथेप्सितेन संयोग इष्टस्याऽऽगमनं यथा ।
प्रणष्टस्य यथा लाभो भवदागमनं तथा ॥४॥
यथा हर्षो नभोगत्या मृतस्य पुनरागमात् ।
तथा त्वदागमाद् ब्रह्मन् स्वागतं ते महामुने ॥५॥
कश्च ते परमः कामः किंच ते करवाण्यहम् ।
पात्रभूतोऽसि मे विप्र प्राप्तः परमधार्मिकः ॥६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पूर्वं राजर्षिशब्देन तपसा द्योतितप्रभः ।
ब्रह्मर्षित्वमनुप्राप्तः पूज्योऽसि भगवन्मया ॥ ७ ॥

विगतेच्छाभयक्रोधो वीतरागो निरामयः ।
इदमत्यद्भुतं ब्रह्मन् यद् भवान्मामुपागतः ॥ ८ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शुभक्षेत्रगतं चाऽहमात्मानमपकल्मषम् ।
चन्द्रबिम्ब इवोन्मग्नं वेद वेद्यविदांवर ॥९॥
त्वामिहाभ्यागतं दृष्ट्वा प्रतिपूज्य प्रणम्य च ।
आत्मन्येव न माम्यन्तर्दृष्ट्वेन्दुं जलधिर्यथा ॥१०॥
यत्कार्यं येन वाऽर्थेन प्राप्तोऽसि मुनिपुङ्गव ।
कृतमित्येव तद्विद्धि मान्योऽसीति सदा मम ॥११॥
स्वकार्ये न विमर्शं त्वं कर्तुमर्हसि कौशिक ।
भगवन्नास्त्यदेयं मे त्वयि यत् प्रतिपद्यते ॥१२॥
कार्यस्य न विचारं त्वं कर्तुमर्हसि धर्मतः ।
कर्त्ता चाऽहमशेषं ते दैवतं परमं भवान् ॥१३॥
तच्छ्रुत्वा राजसिंहस्य वाक्यमद्भुतविस्तरम् ।
हृष्टरोमा महातेजा विश्वामित्रोऽभ्यभाषत ॥१४॥
सदृशं राज-शार्दूल तवैवैतन्महीतले ।
महावंशप्रसूतस्य वसिष्ठवशवर्त्तिनः ॥१५॥
यत्तु मे हृद्गतं वाक्यं तस्य कार्यविनिर्णयम् ।
कुरु त्वं राजशार्दूल धर्मं समनुपालय ॥१६॥
यदा यदा तु यज्ञेन यजेऽहं विबुधव्रजान् ।
तदा तदा तु मे यज्ञं विनिघ्नन्ति निशाचराः ॥१७॥
बहुशो विहिते तस्मिन् मया राक्षसनायकाः ।
अकिरँस्ते महीं यागे मांसेन रुधिरेण च ॥१८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अवधूते तथाभूते तस्मिन् यागकदम्बके ।
कृतश्रमो निरुत्साहस्तस्माद्देशादुपागतः ॥१९॥
त्रातुमर्हसि मामार्त्तं शरणार्थिनमागतम् ।
अर्थिनां यन्निराशत्वं सत्तमेभिभवो हि सः ॥२०॥
तवास्ति तनयः श्रीमान् दृप्तशार्दूलविक्रमः ।
महेन्द्रसदृशो वीर्ये रामो रक्षोविदारणः ॥२१॥
तं पुत्रं राजशार्दूल रामं सत्यपराक्रमम् ।
काकपक्षधरं शूरं ज्येष्ठं मे दातुमर्हसि ॥२२॥
शक्तो ह्येष मया गुप्तो दिव्येन स्वेन तेजसा ।
राक्षसा येऽपकर्त्तारस्तेषां मूर्धविनिग्रहे ॥२३॥
न च ते राममासाद्य स्थातुं शक्ता निशाचराः ।
क्रुद्धं केसरिणं दृष्ट्वा वनेरिण इवैणकाः ॥२४॥
श्रुत्वा वचो मुनिवरस्य महानुभावः
तूष्णीमतिष्ठदुपपन्नपदं हि वक्तुम् ।
नो युक्तियुक्तकथनेन विनैति तोषं
धीमानपूरितमनोभिमतश्च लोकः ॥२५॥

[योगवासिष्ठात्]

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विंशः पाठः

कन्यानां सहकाराऽऽस्वादः [१]

ज्येष्ठे मासि समाप्त आषाढे चारब्धे कन्याविद्यालयस्य प्रधानाध्यापिका "सरोजबाला साहित्यसरस्वती" सर्वा बालिकाः शाद्वलमध्य आहूय ता अपृच्छत् ।

स०—अद्य गगने घना उदिताः । सुखावहः पवनो वाति । ग्रीष्मस्य न प्रकोपः । अतोऽहं वो निनीषामि सहकाराणामुद्यानम् ।

शान्ता—कस्याः कस्याः कक्षाया विद्यार्थिन्यो गमिष्यन्ति ?

स०—या जिगमिषन्ति ताः सर्वा अपि नेष्यामि ।

कान्ता—या इहैव विवर्त्तिषन्ते ता अत्र स्थातुं शक्नुवन्ति न वा ? एष प्रश्नः ।

स०—बाढम् । या अत्र तिष्ठासेयुः ताः स्व-हस्तानुद्धरन्तु ।

[काश्चिद् बालिका हस्तानुत्थापयन्ति]

स०—गीते ! गणय तावत् । कतीमाः सन्ति या अत्र तिष्ठासन्ति ।

गीता—(गणयति एका द्वे तिस्रः चतस्रः पञ्च षट्) अत्र षड् बालिका या आम्रोद्यानं गन्तुं नाभिलषन्ति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स०—या अत्र स्थास्यन्ति ताः शृण्वन्तु। यदि यूयमत्र पिपठिषथ, लिलिखिषथ, सुस्यूषथ वा तर्हि सहर्षमत्र तिष्ठत।

सीता—कार्यं समाप्य किं वयं गृहाणि गन्तुं शक्नुमः?

स०—न शक्नुथ। यावदहमन्याभिर्बालिकाभिः सममत्रोद्यानान्निवर्त्ते तावद्यूयमिह पठत लिखत सीव्यत च। युष्माकं षण्णां निरीक्षणाय "चन्द्रकान्ता विदुषी" अत्र स्थास्यति।

देवी—यद्येवं, तर्हि वयमप्युद्यानं जिगमिषामः। पिपृच्छिषामि खलु यानान्यारुह्य व्रजिष्यामोऽन्यथा वा?

स०—नाऽन्यथा। यानैरेव। विद्यालयमभितो दश स्यन्दनाः सन्ति। तत्र प्रत्येकं पंचेति गणनया गत्वा निषीदत।

[बालाः स्यन्दनानारोहन्ति परस्परञ्च सहर्षमालपन्ति]

सावित्री—आसीना वयं ससुखम्। प्रतिष्ठेमहि?

स०—विरमत क्षणम्। शृणुत म उपदेशम्। अहमाशासे यद् युष्माकं मध्ये काऽपीह न रुरुदिषति। या काचन तत्र रोदिष्यति नाऽसौ रसालाँल्लप्स्यते। अतो या सहकारान्न सिस्वादयिषति न तानीप्सति सैव रुद्यात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गायत्री—न कापि रोदिष्यति। सर्वा एव फलानि जिघृक्षन्ति जिघत्सन्ति च।

स०—युक्तमेतत्। रसं सम्यक् चूषत। त्वच एकत्र करण्डे क्षिपत। अष्ठीलाश्च पृथग्भूमौ संगृह्णीत। न ता जिगरिषथ।

विनता—एवमेव विधास्यामः।

अभ्यासः

धातुः	सामान्यरूपम्	सन्नन्तरूपम्
१ नी	नयति	निनीषति
२ गम्	गच्छति	जिगमिषति
३ वृत्	वर्तते	विवर्तिषते
४ स्था	तिष्ठति	तिष्ठासति
५ पठ्	पठति	पिपठिषति
६ लिख्	लिखति	लिलिखिषति
७ सिव्	सीव्यति	सुस्यूषति
८ प्रच्छ्	पृच्छति	पिपृच्छिषति
९ स्वद्	स्वदते (प्रे० स्वादयति)	सिस्वादयिषति
१० रुद्	रोदिति	रुरुदिषति
११ आप्	आप्नोति	ईप्सति
१२ ग्रह्	गृह्णाति	जिघृक्षति
१३ अद्	अत्ति	जिघत्सति
१४ गॄ	गिरति	जिगरिषति

प्रश्नोत्तराणि

१—प्रधानाऽध्यापिकायाः किं नामाऽऽसीत्? सरोजबाला।
२—तस्या उपाधिः कोऽत्र दत्तः? साहित्यसरस्वती।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३—कासांचित्कन्यानां नामानि लिख।
शान्ता । कान्ता । गीता। सीता । देवी । सावित्री । गायत्री विनता ।
४—सहायिकाध्यापिकायाः किं नामाऽऽसीत् ? चन्द्रकान्ता विदुषी।
५—अर्थान् लिख—करण्डे। अष्ठीला। रसालान्। स्यन्दनान्। श्रणुत। जिगरिषथ।

एकविंशः पाठः

कन्यानां सहकाराऽऽस्वादः [२]

सर्वाः कन्याः पञ्च पङ्क्तिषूपविष्टाः। पङ्क्तीनां च मध्यश आम्रकूटान्युद्यानपालिकाऽरचयत्। द्वे सहस्रे द्वे शते पञ्चकञ्च रसालानां तत्रासन्। अथ प्रधानाध्यापिका कन्यानां पुरतः स्थित्वाऽब्रवीत्।

स०—अद्य प्रातरेव वयं विद्यालयादिहाऽऽयाताः। प्रार्थना च न तत्र कृता। अतोऽत्रैव चूषणात्फलानां पूर्वं तां कर्त्तुमिच्छामि।

ऊर्म्मिला—वयमपि भगवन्तं सभक्तिं तुष्टूषामो यस्य दयया वयमिह फलान्यत्स्यामः।

[सर्वाः शान्त्योपविश्य यथारीति प्रार्थनां कुर्वन्ति]

स०—यूयं संप्रतीह यथेच्छं भुङ्ध्वम् तत्र च वयमध्यापिकास्तथा कुर्मः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

[आम्रान्सर्वाश्चूषन्ति]

मदालसाऽतीव चञ्चलाऽऽसीत् । सा निभृतं स्वपङ्क्ते र्गताऽऽरोहच्चैकं तरुम् । आह्वयच्च तत एवैकां स्वां सखीं सङ्क्रान्तिनामिकाम् । तस्या आह्वानं निशम्यैकाऽध्यापिका "मृणालिनी विद्वत्तमा" सरोजबाला साहित्यसरस्वती-मभणत् "शृणोति भवती मदालसायाः कण्ठस्वरम् । सा नूनं भूयांसि फलानि मुमुषिषति अतएव तरुमारुढास्ते ।

स०—वयन्त्विह फलास्वादमारिप्सामहे तत्र च सा दण्डं लिप्सते । चपलतमा खल्वियं मदालसा । कष्टं दित्सामि "विद्यावति विद्यावारिधे" भवत्याः । गच्छतु भवती तत्र तथाऽऽनयतु तामपराधिनीमत्र ।

विद्यावती विद्यावारिधिः—(गच्छति । तरोरधस्ताच्च स्थित्वा मदालसां ब्रवीति) अयि मदालसे किं तत्र करोषि दृक्षे । सर्वास्तु ते सख्यो वृक्षच्छायाऽऽस्थिताः फलास्वाद-सुखमनुभवन्ति । किं तरोर्भूमौ पिपतिषसि ततश्च मुमूर्षसि ?

मदालसा—(ससाध्वसमनोकहशाखामवलम्ब्य) क्षमतां संप्रति ममाग एतत् । न पुनरित्थं करिष्ये । नाहं पित्सामि न चाऽऽत्मानं जिघांसामि । केवलमहं तं मयूरं दिदृक्षे योऽधुना घनावलीं वीक्ष्य कानने निनर्त्तिषति ।

विद्यावती विद्यावारिधिः—इदानीमवतितरिषसि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न वा ? त्वं नैव कदाचिदस्माकं वचांसि शुश्रूषसे । स्मरसि गतमासे सरस्वतीमहोदया प्रधानाध्यापिका किमकथयत्ते ?



मदालसा—स्मरामि सम्यक् । सम्प्रति सौम्याऽहं बुभूषामि । जिगीषामि सर्वा अप्यस्मत्सखीः स्वैर्गुणैः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विद्यावारिधिः—विवधिषते कोपः प्रधानाध्यापिकायाः। किं तर्हि ब्रवीषि ?

मदालसा—सत्यमेव प्रतिजाने। नायतौ ममापराधान् दिदृक्षमाणापि भवती द्रष्टुं शक्ष्यति।

विद्यावारिधिः—यद्येवं। तिष्ठ तरोर्मूले। पश्येमे बालिकाः सुषुप्सन्ति फलानि जग्ध्वा। त्वमपोह मुहूर्त्तं विश्राम्य। कथयिष्यामि सरस्वत्यै, "भवतीं मदालसा क्षमां याचतेऽहंति च सा क्षमेति।"

[मदालसापि शनैः शनैः सखीरुपसृत्य शाद्वले शयनं नाटयति]

अभ्यासः

धातुः	साक्षात्यरूपम्	सन्नन्तरूपम्
१ स्तु	स्तौति	तुष्टूषति
२ सुप्	सुष्णाति	सुसुप्सति
३ आ+रभ्	आरभते	आरिप्सते
४ लभ्	लभते	लिप्सते
५ दा	ददाति	दित्सति
६ पत्	पतति	पिपतिषति पित्सति
७ मृ	म्रियते	मुमूर्षति
८ हन्	हन्ति	जिघांसति
९ नृत्	नृत्यति	निनर्तिषति
१० तृ	तरति	तितीर्षति
११ श्रु	शृणोति	शुश्रूषते
१२ भू	भवति	बुभूषति
१३ जि	जयति	जिगीषति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१४ वृध् वर्धते विवर्धिषते ।
१५ स्वप् स्वपिति सुषुप्सति ।

विग्रहवाक्यान्युक्त्वा समासानां नामानि वद यथारीति । यथेच्छम् । सभक्ति । गतमासे ।

पर्यायशब्दान् ब्रूहि

काननम् । कोपः । द्रष्टुम् । भूमौ । तरोः ।

द्वाविंशः पाठः

आश्रमः

प्रशान्ते वातावरणे, शीतलेन मन्देन तथा सुरभिणा वायुना पावने, विमल-जलयाऽऽपगया समुल्लासिते स्थले पुरतोऽयमाश्रमो दृश्यते ।

अत्र बहवो विद्यार्थिनोऽधीयते । तेऽहोरात्रमिहैव निवसन्ति दूरे नगराणां कोलाहलात् । केनाऽपिच्छात्रेण ऋग्वेदः पठ्यते, केनचिद् यजुर्वेदः, केनचित् सामवेदः, केनचिच्चाथर्ववेदः ।

गुरुभिरप्यत्रैव दिवानिशं स्थीयते । विद्यार्थिनः पाठयद्भिस्तैः स्वः समयो याप्यते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वे रस्मिन्नाश्रमे निवसद्भिर्धेनूनां दुग्धं पीयते, सूपौदनं भुज्यते, हैयङ्गवीनं लिह्यते, शुद्धं च पानीयमुपयुज्यते ।



नित्यं सर्वैः सन्ध्या उपास्यते, सूर्याय अर्घ्यं दीयते व्यायामोऽनुष्ठीयते, हवनाय एधांसि आह्रियन्ते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पर्वसु साम गीयते, अनलः प्रज्वाल्यते, इन्द्राग्नी आह्वयेते, समिध आधीयन्ते, आहुतयो हूयन्ते, पुरोडाशः पच्यते, संस्रवः प्राश्यते, महाँश्चानन्दोऽनुभूयते ।

यदा वैदिकैर्ऋचः उच्चार्य्यन्ते तदा कश्चिदध्येति "यस्मान्न ऋते किंचन कर्म्म क्रियते तन्मे मनः शिव-सङ्कल्प-मस्तु ।" अन्यो ब्रवीति, "नमस्ते रुद्रमन्यव उतोत इषवे नमः। बाहुभ्यामुत ते नमः"। "पश्येम शरदः शतं। जीवेम शरदः शतं। शृणुयाम शरदः शतं। प्रब्रवाम शरदः शत मदीनाः स्याम शरदः शत"मित्यपरेणाधीयते। इत्थं सस्वरमाम्नायमभ्यस्यतां घोष उद्गच्छति नभः। आश्र-मश्च गुञ्जति ।

होमधूमेन कुटीराणां कुड्या मलिना विधीयन्ते किन्तु तन्निवासिनां हृदयानि तु निर्मलान्येव क्रियन्ते।

पूर्णिमायाममायामष्टम्यां प्रतिपदायां च प्रतिमास-मनध्यायो भवति । उक्तानां तिथीनां तिसृषु बालकैः सानन्दं काननेषु विह्रियते, सरिति तीर्य्यते जलाशयेषु प्लुयते पुष्पाणि चोयन्ते, गुरवः सेव्यन्ते तथा पूर्वमधीताः अध्यायाः पुनरावर्त्यन्ते। किन्तु प्रतिपदायां तैः प्राक् पठिता अपि पाठा नानुशीलयन्ते। तस्यां तिथौ तैः पूर्णो विश्रामोऽनुभूयते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सत्त्वोद्रेकोऽत्राश्रमे विराजते। अत्रत्यानां गात्राणि बलिष्ठानि, मनांसि प्रफुल्लानि, आचाराः शास्त्रानुकूलाः, विचाराश्च वेदैरनुमोदिताः सन्ति।

भारते प्राचीनगौरवं पुनरानेतुमनोभिर्नेतृभिरीदृशा आश्रमा अनेके उद्घाटनीया इति काम्यते अस्माभिः॥

अभ्यासः

	धातुः	कर्तृवाच्ये	कर्मवाच्ये भाववाच्ये वा
१	दृश्	पश्यति	दृश्यते
२	पठ्	पठति	पठ्यते
३	स्था	तिष्ठति	स्थीयते
४	या	याति [प्रेरणार्थक—यापयति]	याप्यते
५	पा	पिबति	पीयते
६	भुज्	भुंक्ते	भुज्यते
७	लिह्	लेढि	लिह्यते
८	उप+युज्	उपयुङ्क्ते	उपयुज्यते
९	उप+आस्	उपास्ते	उपास्यते
१०	दा	दत्ते	दीयते
११	अनु+ष्ठा	अनुतिष्ठति	अनुष्ठीयते
१२	गै	गायति	गीयते
१३	ज्वल्	ज्वलति [प्रेरणार्थक—ज्वालयति]	प्रज्वाल्यते
१४	आ+हृ	आहरति	आहियते
१५	आ+ह्वे	आह्वयति	आहूयते
१६	हु	जुहोति	हूयते
१७	अधि+इ	अधीते	अधीयते
१८	पच्	पचति	पच्यते
१९	प्र+अश्	प्राश्नाति	प्राश्यते
२०	अनु+भू	अनुभवति	अनुभूयते

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२१	उत्+चर्	उच्चरति [प्रेरणार्थक—उच्चारयति]	उच्चार्यते
२२	कृ	कुरुते	क्रियते
२३	वि+धा	विधत्ते	विधीयते
२४	वि+हृ	विहरति	विह्रियते
२५	तॄ	तरति	तीर्यते
२६	प्लु	प्लवते	प्लूयते (प्लव्यते)
२७	चि	चिनोति	चीयते
२८	आ+वृत्	आवर्त्तते [प्रेरणार्थक—आवर्त्तयति]	आवर्त्यते
२९	अनु+शील्	अनुशीलयति	अनुशील्यते
३०	कम्	कामयते	काम्यते

टिप्पणी—अकर्म्मकाद् धातोः कर्तृवाच्यं भाववाच्यं च भवतः, सकर्म्मकाणान्तु कर्तृवाच्यं कर्म्मवाच्यं च।

त्रयोविंशः पाठः

पदानां व्याख्याया आदर्शः

श्लोकः

समरे हेमरेखाङ्कं बाणं मुञ्चति राघवे।
स रावणोऽप्यमुञ्चच्च मध्ये रीतिधरं शरम्॥

पदबोधः

१—समरे। अकारान्तः पुँल्लिङ्गः समरशब्दः, तस्य सप्तम्या एकवचनम्। युद्धे इत्यर्थः।

२—हेमरेखाङ्कम्। हेम्नः रेखा इति हेमरेखा, षष्ठीतत्पुरुषसमासः। हेमरेखायाः अंकः अस्ति यस्मिन्स

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हेमरेखाङ्कः, तं तथोक्तम् बहुव्रीहिसमासः। स्वर्णलेखा-चिह्नितम् इत्यर्थः।

३—बाणम्। अकारान्तः पुँल्लिङ्गो बाणशब्दः, तस्य द्वितीयाया एकवचनम्। शरम् इत्यर्थः।

४—मुञ्चति। मुच्+शतृ=मुञ्चत्। तकारान्तस्य "मुञ्चत्" शब्दस्य सप्तमीविभक्तेरेकवचनम्। प्रहरति इत्यर्थः।

५—राघवे। रघोः अपत्यम् इति राघवः। अकारान्त-पुँल्लिङ्गराघवशब्दस्य सप्तम्यैकवचनम्। रामे इत्यर्थः।

६—सः। तदिति सर्वनामशब्दस्य पुँल्लिङ्गे प्रथमैक-वचनम्। "असौ" इत्यर्थः।

७—रावणः। अकारान्तः पुँल्लिङ्गः। प्रथमाविभक्ते-रेकवचनम्। लंकेश्वर इत्यर्थः।

८—अपि। अव्ययम्।

९—अमुञ्चत्। मुच् धातुः, परस्मैपदम् तुदादिगणः भूतकालः, प्रथमपुरुषः, एकवचनम्। अत्यजत् इत्यर्थः।

१०—च। अव्ययम्।

११—मध्ये। अकारान्तपुँल्लिङ्गमध्यशब्दस्य सप्तम्येक-वचनम्। मध्यभागे इत्यर्थः।

१२—रीतिधरम्। धरतीति धरः। रीतेः धरः इति रीतिधरः, षष्ठीतत्पुरुषसमासः। पित्तलवन्तम् इत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१३—शरम्। अकारान्तशरशब्दस्य द्वितीयैकवचनम्।

अन्वय :—

समरे राघवे हेमरेखाङ्कं बाणं मुञ्चति स रावणोऽपि च मध्ये रीतिधरं शरममुञ्चत्।

अन्वयानुसारिणः पर्यायाः—

युद्धे रामचन्द्रे स्वर्णलेखाचिह्नितं सायकं प्रहरति [सति] असौ लंकेश्वरोऽपि च मध्यभागे पित्तलवन्तं बाणमत्यजत्।

भाषार्थ :—

लड़ाई में राम के सोने की रेखावाले तीर के छोड़ने पर उस रावण ने भी बीच में पीतल लगे हुए तीर को छोड़ा।

संस्कृते विशदोऽर्थः

लङ्कायां रामरामणयोर्युद्धमभवत्। एकदा यदा रामः स्वचापात् सुवर्ण-घटितमेकं सायकं रावणोपरि प्राहरत्तदाऽसौ रावणोऽपि प्रत्युत्तरे रामोपरि पित्तलघटितमेकं शरं स्वचापात् प्रहरति स्म।

चतुर्थचरणस्य विचित्रोऽर्थः—

मध्ये रीतिधरं शरम्। मध्यभागे "रो" इति धरम् शरम्। शरशब्दे द्वौ वर्णौ स्तः, प्रथमः शकारः, द्वितीयश्च रकारः। शकाररकारयोर्मध्ये यदि वयं "रो" इति वर्ण-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मपि लिखामः तदा "शर"—स्थाने शरीरशब्दः भवति तद्यथा :—

शुद्ध :————————	श		र
मध्ये 'री' धरः————————	श	री	र

अतो यदा रामः स्वर्णजटितं सायकं रावणस्योपरि प्राक्षिपत्तदा रावणो "मध्ये री इति धरं शरम्" अर्थात् शरीरम् अमुञ्चत्। शरीरमोचनं च मृत्युः। रामस्य बाणेन रावणो हत इति संक्षेपः।

चतुर्विंशः पाठः

अन्तरालापाः

१ कस्तूरी जायते कस्मात् ?
को हन्ति करिणां शतम् ?
भीतः किं कुरुते युद्धे ?
मृगात्, सिंहः, पलायते ॥

टिप्पणी—त्रिषु चरणेषु कृतानां प्रश्नानामेकत्र चतुर्थे चरणे उत्तराणि दत्तानि। तद्यथा :—

प्रथमः प्रश्नः—कस्तूरी कस्माज्जायते ?
उत्तरम्—मृगात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयः प्रश्नः—करिणां शतं को हन्ति ?

उत्तरम्—सिंहः !

तृतीयः प्रश्नः—कातरो युद्धे किं कुर्यात् ?

उत्तरम्—पलायनम् ।

शैलीयमन्यत्राप्युपयोज्या

२ भोजनान्ते च किं पेयम् ?
जयन्तः कस्य वै सुतः ?
कथं विष्णुपदं प्रोक्तम् ?
तक्रं, शक्रस्य, दुर्लभम् ॥

३ युधिष्ठिरः कस्य पुत्रो ?
गङ्गा वहति कीदृशी ?
हंसस्य शोभा का वास्ति ?
धर्मस्य, त्वरिता, गतिः ॥

४ विवाहे पुरंध्री—जनैर्लिप्यते का ?
न के मानमायान्ति ? गर्वोन्नता का
घने वारिधौ ? रामतः क्रन्दते का ?
हरिद्रा, दरिद्रः, सरिद्, रावणश्रीः ॥

अन्योक्तयः

[चन्द्रे]

१ आलोकवन्तः सन्त्येव भूयांसो भास्करादयः ।
कलावानेव तु ग्राव-द्राव-कर्मणि कर्मठः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

[मेघे]

२ मुञ्च मुञ्च सलिलं दयानिधे
नास्ति नास्ति समयो विलम्बने ।
अद्य चातककुले मृते पुन-
र्वारि वारिधर किं करिष्यसि ॥

[मलयगिरौ]

३ किं तेन हेमगिरिणा रजताद्रिणा वा ।
यत्राऽऽश्रिता हि तरवस्तरवस्त एव ॥
मन्यामहे मलयमेव यदाश्रयेण ।
कण्डूखोट-निम्ब-कुटजा अपि चन्दनानि ॥

कठिनशब्दार्थाः

कस्तूरी	musk	मृगमद
कातरः	coward	डरपोक
पलायते	runs away	भागता है
विष्णुपदम्	Divine abode: salvation	वैकुण्ठ । मुक्ति
शक्रः	king of gods	इन्द्र
त्वरिता	rapid	जल्दी
पुरन्ध्री	family-woman, matron	स्त्री
वारिधिः	ocean	सागर
आलोकः	light	प्रकाश
कलावान्	moon	चन्द्रमा
ग्रावा	stone	पर्वत
द्रावः	melting	पिघलाना

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कर्मठः	one who does well	बहुत काम करनेवाला
लभन्तान्तराम्	may get very well	बहुत पावें
हेमगिरिः	golden mountain (Sumeru)	सोने का पहाड़ (सुमेरु)
रजताद्रिः	mountain of silver (Kailash)	चाँदी का पहाड़ (कैलाश)
शाखोटः	a tree	सहोड़ा
निम्बः	Neem-tree	नीम
कुटजः	a tree	कुड़ा

पञ्चविंशः पाठः

नीतिश्लोकाः

त्याज्यं न धैर्यं विधुरेऽपि काले
धैर्यात्कदाचिद् गतिमाप्नुयात् सः ।
यथा समुद्रेऽपि च पोतभङ्गे
सांयात्रिको वाञ्छति तर्त्तुमेव ॥१॥

किमिष्टमन्नं खर-शूकराणाम्
किं रत्नहारो मृगपक्षिणां च ।
अन्धस्य दीपो बधिरस्य गीतम्
मूर्खस्य किं शास्त्रकथाप्रसंगः ॥२॥

न वेत्ति यो यस्य गुणप्रकर्षम्
स तं सदा निन्दति नाऽत्र चित्रम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यथा किराती करिकुम्भजाताम्
मुक्तां परित्यज्य बिभर्त्ति गुञ्जाम् ॥३॥

गिरौ मयूरा गगने पयोदा
लक्षाऽन्तरेऽर्कश्च जलेषु पद्मम् ।
इन्दुर्द्विलक्षं कुमुदस्य बन्धु-
र्यो यस्य मित्रं नहि तस्य दूरम् ॥४॥

जितेन्द्रियत्वं विनयस्य कारणम्
गुणप्रकर्षो विनयादवाप्यते ।
गुणाधिके पुंसि जनोऽनुरज्यते
जनानुरागः प्रभवो हि सम्पदः ॥५॥

संपूर्णकुम्भो न करोति शब्दम्
अर्धो घटो घोषमुपैति नूनम् ।
विद्वान् कुलीनो न करोति गर्वम्
गुणैर्विहीना बहु जल्पयन्ति ॥६॥

अनेकशास्त्रं बहु वेदितव्यम्
अल्पश्च कालो बहवश्च विघ्नाः ।
यत्सारभूतं तदुपासितव्यम्
हंसो यथा क्षीरमिवाम्बुमध्यात् ॥७॥

न सा सभा यत्र न सन्ति वृद्धा
वृद्धा न ते ये न वदन्ति धर्मम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धर्मो न वै यत्र च नास्ति सत्यम्
सत्यं न तद् यच्छलनानुविद्धम् ॥८॥

पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यमवद्यम् ।
सन्तः परीक्ष्यान्यतरद् भजन्ते
मूढः पर-प्रत्यय-नेय-बुद्धिः ॥९॥

तृणानि नोन्मूलयते प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वतः ।
समुच्छ्रितानेव तरून् प्रबाधते
महान् महत्येव करोति विक्रमम् ॥१०॥

निमित्तमुद्दिश्य हि यः प्रकुप्यति
ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणद्वेषि मनस्तु यस्य वै
कथं जनस्तं परितोषयिष्यति ॥११॥

उदीरितोऽर्थः पशुनाऽपि गृह्यते
हयाश्च नागाश्च वहन्ति नोदिताः ।
अनुक्तमप्यूहति पण्डितो जनः
परेङ्गितज्ञानफला हि बुद्धयः ॥१२॥

गुणी गुणं वेत्ति न वेत्ति निर्गुणो
बली बलं वेत्ति न वेत्ति निर्बलः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पिको वसन्तस्य गुणं न वायसः
करो च सिंहस्य बलं न मूषकः ॥१३॥
मतिरेव बलाद् गरीयसी
यदभावे करिणामियं दशा ।
इति घोषयतीव डिण्डिमः
करिणो हस्तिपकाहतः क्वणन् ॥१४॥
सहसा विदधीत न क्रियाम्
अविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणम्
गुणलुब्धाः स्वयमेव सम्पदः ॥१५॥

कठिनशब्दार्थाः

१ विधुरेऽपि काले	even in straitened circumstances	विपत्ति के समय में भी
२ पोतः	ship	जहाज़
३ सांयात्रिकः	one who trades th rough ships	जहाज़ के द्वारा व्यापार करनेवाला
४ खरः	donkey	गधा
५ शूकरः	boar	सूअर
६ चित्रम्	wonder	अद्भुत बात
७ किराती	Bheel's wife	भीलनी
८ करिकुम्भः	elephant's temple	हाथी की कनपटी
९ गुञ्जा	berry of the Gunja plant	रत्ती
१० प्रभवः	generator	उत्पादक
११ छलनम्	fraud	धोखा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१२ अवद्यम्	condemnable	निन्दनीय
१३ अन्यतरत्	either of the two	दो में स एक
१४ प्रत्ययः	conception, thought, belief	विचार। विश्वास
१५ निमित्तम्	reason, cause	कारण। हेतु
१६ अपगमः	removal	हटना। शान्त होना
१७ उदीरितः	spoken	उक्त। कहा हुआ
१८ वायसः	crow	कौआ
१९ डिण्डिमः	bell	घंटी
२० हस्तिपकः	elephant driver	महावत

पर्यायशब्दाः

१ खरः। रासभः। गर्दभः। चक्रीवान्। वालेयः।

२ शूकरः। वराहः। कोलः। किरिः। पात्री। किटिः।

३ हस्तिपकः। आधोरणः। महामात्रः। निषादी

४ काकः। वायसः। ध्वांक्षः। मौकुलिः।

समासाः

१ पोतस्य भङ्गः इति पोतभङ्गः [षष्ठीतत्पुरुषः]

२ खराश्च शूकराश्च इति खरशूकराः [द्वन्द्वः]

३ जितानि इन्द्रियाणि येन इति जितेन्द्रियः [बहुव्रीहिः]

४ सम्पूर्णश्चासा कुम्भ इति संपूर्णकुम्भः [कर्मधारयः]

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

षड्विंशः पाठः

न्यायाः (कहावतें)

(१) अन्धगजन्यायः

स्व-बुद्धि-कल्पितानेवाऽर्थान् सिद्धान्तरूपेण यदा वादिनो मन्यन्ते परस्परं च विवदन्ते तदाऽस्य न्यायस्य प्रयोगः क्रियते। केचिदन्धा गजस्य विभिन्नानवयवान् स्पृष्ट्वा मिथो गजविषये विवादमकुर्वन्। सूर्पसदृशो गज इति कर्णस्पर्शी अवदत्, मुसलेन समान इति करस्पर्शी, स्तम्भवद् भवतीति जंघास्पर्शी, रज्जुसम इति पुच्छस्पर्शी।

(२) कूपमण्डूकन्यायः

संकीर्णविचाराः पुरुषा यदा स्वान् विचारानेव सत्यत्वेन अङ्गीकुर्वन्ति न च मन्यन्तेऽन्येषां वचांसि तदाऽयं न्यायः प्रयुज्यते। समुद्रवासी कश्चिद् भेकः कूपवासिनं मण्डूकमेकं द्रष्टुमुपागतः। कूपस्थेन पृष्ट आगन्तुकः सागरमवर्णयत् किन्तु कूपमण्डूकस्य मतौ सागरदैर्घ्यं नैवाऽभात्।

(३) अन्धचटकन्यायः

दैवाल्लब्धं वस्तु यदा श्रमं विनैव पुरुषं सुखयति तदाऽस्य न्यायस्य प्रयोगो भवति। कश्चिन्नेत्राभ्यां हीनो नरः करौ प्रसार्य तिष्ठन्नासीत्। अकस्माच्चटक एकस्तस्यैक-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्मिन् करमध्येऽतिष्ठत्। अगृह्णाच्चान्धस्तम्। अथ स उदघोषयद्यदहं चटकमगृह्णाम्।

(४) घुणाक्षरन्यायः

यदा कश्चिदयोग्योऽकस्मात्किमप्यतर्कितं कुरुते तदाऽयं न्यायः प्रयोगमायाति। यथा घुणेन भक्षिते काष्ठेऽकस्मादकारादिभिः समानेषु रन्ध्रेषु जातेषु कल्प्यते यदिमे वर्णा घुणेन निर्मिता इति।

(५) मण्डूकतोलनन्यायः

महाकठिने कार्ये समुपस्थितोऽयं प्रयुज्यते। तुला मारोप्य भेकानां भारस्य निर्णयः कठिन एव यतस्तेष्वारोपितेषु ते क्रमश उत्प्लुत्योत्प्लुत्य भूमौ पतन्ति।

(६) सच्छिद्रघटाम्बुन्यायः

यस्मिन्कर्म्मणि क्रियमाणे श्रमो वृथा भवेत्तत्रास्य प्रयोगः। यदि कश्चित्कलशं वारिणा पूरयितुमिच्छति, कलशे चाधस्तात्तले रन्ध्रमास्ते, तर्हि तत्पात्रस्याऽम्बुना प्रपूरणे विहितः परिश्रमोऽकिञ्चित्कर एव भवति।

(७) बिल्वखल्वाटन्यायः

हतभाग्यानां निन्दायामयं प्रयुज्यते। कश्चित्खल्वाटो मूर्ध्नि केशानामभावादातपेन तापितो महद्दुःखमन्वभवत्। तस्माद् दुःखादात्मानं त्रातुकामोऽसौ छायां लिप्सुर्बिल्वतरोस्तले निषण्णः। अथ तत्तरुपरि आसीनः कश्चिद् विह-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ङ्गमः स्व-चञ्च्वा बिल्वफलवृन्तमकृन्तत् । तच्च वृन्तादपगतं खल्वाटस्य मूर्धन्यवापतत् क्लेशं च दुस्सहं तस्याददात् ।

द्रष्टव्योऽत्रायं श्लोकः —

खल्वाटो दिवसेश्वरस्य किरणैः सन्तापितो मस्तके
वांछन्देशमनातपं विधिवशाद् बिल्वस्य मूलं गतः ।
तत्राप्याशु महाफलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः ।

(८) जलमन्थनन्यायः

व्यर्थ-कार्यकरणेऽस्य न्यायस्य व्यवहारः । दधि मथ्नन्ती गोपी घृतमाप्नोति किन्तु जलं मथ्नन्ती सा किं लप्स्यते ? न किमपि ।

(९) रज्जुसर्पन्यायः

अज्ञानेनान्यस्मिन्वस्तुनि वस्तुनोऽन्यस्य भ्रान्तिर्यदा भवति तदाऽयं न्यायो व्यवह्रियते । तमसो बाहुल्येन नेत्रयोः स्वकार्यं सम्यङ् नाऽऽचरतोः कदाचिद् रज्जुरपि सर्प इव प्रतीयते ।

(१०) सूचीकटाहन्यायः

द्वयोः कार्ययोः समुपस्थितयोः सतोः प्रथमं कष्टसाध्यमपि कार्यं विहाय यदा द्वितीयमेव सुकरं पूर्वमनुष्ठीयते तदाऽस्य न्यायस्य प्रयोगो विधीयते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कस्यचिल्लौहकारस्याऽऽपणे द्वौ पुरुषौ समायातौ। कटाहमेकं मे रचयेति प्रथमस्याऽऽसीत्प्रार्थना, द्वितीयस्य चाऽऽसीत् सूचीं मे गृहीति। अथ लौहकारः प्रथमस्य कार्यमकुर्वाणो द्वितीयस्यैव सूचीं पूर्वमरचयत् पश्चाच्च कटाहम्।

सप्तविंशः पाठः

सूक्तयः।

१ प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्।
२ उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये।
३ न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते।
४ सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः।
५ प्रोद्दीप्ते भवने तु कूप-खननं प्रत्युद्यमः कीदृशः।
६ सम्भावितस्य चाऽकीर्तिर्मरणादतिरिच्यते।
७ स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।
८ गुणान् कृत्स्नान् परित्यज्य स्वभावो मूर्ध्नि वर्त्तते।
९ निरस्तपादपे देशे, एरण्डोऽपि द्रुमायते।
१० कस्यचित्तु दहेद्वेश्म कश्चिद्धस्तौ प्रतापयेत्।
११ जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१२ प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते ।
१३ या लोकद्वयसाधनी तनुभृतां सा चातुरी चातुरी ।
१४ वरं भिक्षाशित्वं न च पर-धनाऽऽस्वादनसुखम् ।
१५ वरं वह्नौ पातस्तदपि न कृतः शील-विलयः ।
१६ विद्वान्विभाति पुरुषेषु विचक्षणेषु ॥
१७ वरं प्राणत्यागो न पुनरधमानामुपगमः ।
१८ सतां माने म्लाने मरणमथवा दूरगमनम् ।
१९ मणिरशुरपि भूषणाय पुंसां न तु पृथुलैव
शिला विलासहेतुः ।

२० स धार्मिको यः परमर्म न स्पृशेत् ।
२१ परेङ्गितज्ञानफला हि बुद्धयः ।
२२ श्रियः समृद्धा अपि हन्ति दुर्नयः ।
२३ नये च शौर्ये च वसन्ति सम्पदः ।
२४ यथौषधं स्वादु हितं च दुर्लभम् ।
२५ गुणैर्विहीना बहु जल्पयन्ति ।
२६ यो यस्य मित्रं नहि तस्य दूरम् ।
२७ महाजनो येन गतः स पन्थाः ।
२८ नैकत्र सर्वो गुणसन्निपातः ।
२९ सन्तोषतुल्यं धनमस्ति नान्यत् ।
३० समानशीलव्यसनेषु सख्यम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कठिनशब्दार्थाः

१	पङ्कम्	mud, mire	कीचड़
२	दैवम्	fate	भाग्य
३	पुरुषार्थः	human effort	परिश्रम
४	सम्भावितः	respected	प्रतिष्ठित
५	अतिरिच्यते	excels, surpasses	बढ़कर है
६	निधनम्	death	मृत्यु
७	कृत्स्नः	entire	संपूर्ण
८	एरण्डः	castor-oil plant	एरण्ड वृक्ष
९	द्रुमायते	acts as a tree	पेड़ जैसा काम करता है
१०	गरीयसी	heavier, more respectable	अधिक पूज्य
११	मन्दः	slow, lazy	नीच
१२	तनुभृत्	living being	शरीरधारी
१३	शीलविलयः	disappearance of virtuous life	सद्गुणों का त्याग
१४	विचक्षणाः	clever	चतुर
१५	उपगमः	approach, service	पास जाना, सेवा
१६	पृथुलः	broad	चौड़ा
१७	मर्म	sensitive or vital part (heart)	हृदयादि सुकुमार स्थान
१८	दुर्नयः	vicious way of life	अनाचार
१९	गुणसन्निपातः	collection of merits	गुणों का एकत्रीभाव
२०	व्यसनम्	habit	लत। आदत

टिप्पणी

उपरिदत्तानां सूक्तीनां समानार्थाः सूक्तय आंग्लभाषायां मातृभाषायां चाऽन्वेषणीयाः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अष्टाविंशः पाठः

गोपाल-बालानां तालफलभक्षणम्

श्रीदामा नाम गोपालो राम-केशवयोः सखा ।
सुबल-स्तोककृष्णाद्या गोपाः प्रेम्णेदमब्रुवन् ॥१॥
"राम राम महाबाहो कृष्ण दुष्ट-निबर्हण ।
इतोऽविदूरे सुमहद् वनं तालालिसंकुलम् ॥२॥
फलानि तत्र भूरीणि पतन्ति पतितानि च ।
सन्ति किन्त्ववरुद्धानि धेनुकेन दुरात्मना ॥३॥
सोऽतिदुष्टोऽसुरो राम! हे कृष्ण! खर-रूप-धृक् ।
आत्मतुल्यबलैरन्यैर्ज्ञातिभिर्बहुभिर्वृतः ॥४॥
तस्मात् कृतनराहाराद् भीतैर्नृभिरमित्रहन् !
न सेव्यते पशुगणैः पक्षिसङ्घैर्विवर्जितम् ॥५॥
विद्यन्तेऽभुक्तपूर्वाणि फलानि सुरभीणि च ।
एष वै सुरभिर्गन्धो विषूचीनोऽवगृह्यते ॥६॥
प्रयच्छ तानि नः कृष्ण! गन्ध-लोभितचेतसाम् ।
वाञ्छाऽस्ति महती राम! गम्यतां यदि रोचते" ॥७॥
एवं सुहृद्वचः श्रुत्वा सुहृत्प्रियचिकीर्षया ।
प्रहस्यागच्छतां गोपैर्वृतौ तालवनं प्रभू ॥८॥
बलः प्रविश्य बाहुभ्यां तालान् सम्परिकम्पयन् ।
फलान्यपातयत्तत्र मतंगज इवौजसा ॥९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

फलानां पततां शब्दं निशम्याऽसुर-रासभः ।
अभ्यधावत्क्षितितलं सनगं परिकम्पयन् ॥१०॥
समेत्य तरसा प्रत्यग् द्वाभ्यां पद्भ्यां बलं बली ।
निहत्योरसि काशब्दं मुञ्चन् पर्यसरत् खलः ॥११॥
पुनरासाद्य संरब्ध उपक्रोष्टा पराक् स्थितः ।
चरणावपरौ राजन् बलाय प्राक्षिपद् रुषा ॥१२॥
स तं गृहीत्वा प्रपदोर्भ्रामयित्वैकपाणिना ।
अक्षिपत्तृणराजाग्रे भ्रामणत्यक्तजीवितम् ॥१३॥
तेनाऽऽहतो महातालो वेपमानो बृहच्छिराः ।
पार्श्वस्थं कम्पयन् भग्नः स चान्यं सोऽपि चापरम् ॥१४॥
ततः कृष्णं च रामं च ज्ञातयो धेनुकस्य ये ।
क्रोष्टारोऽभ्यद्रवन् सर्वे संरब्धा हतबान्धवाः ॥१५॥
तांस्तानापततः कृष्णो रामश्च नृप ! लीलया ।
गृहीत—पश्चाच्चरणान् प्राहिणोत्तृणराजसु ॥१६॥
फल-प्रकर - संकीर्णं दैत्य - देहैर्गताऽसुभिः ।
अराजद् भूः सतालाग्रैर्घनैरिव नभस्तलम् ॥१७॥
अथ तालफलान्यादन् मनुष्या गतसाध्वसाः ।
तृणं च पशवोऽखादन् हत-धेनुक-कानने ॥१८॥
कृष्णः कमलपत्राक्षः पुण्य-श्रवण-कीर्तनः ।
स्तूयमानोऽनुगैर्गोपैः साऽग्रजो व्रजमाव्रजत् ॥१९॥

[भागवतम्]

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

टिप्पणी

तालवनं धेनुकस्यासीत्। असौ मूर्खः प्रसिद्धः, मूर्खाश्च विद्वद्भिर्गर्दभाः कथ्यन्त एव। तस्य येऽपरे सहाया आसन् ते सर्वेऽपि तथैव पशुभावेन जीवनमयापयन्। वृक्षेषु स्वादिष्टानि फलान्यभवन् परं ते मूर्खा भद्रान् बुभुक्षितान् गोपान् सदैवाऽवारयन्। गोपबालकेभ्यो धेनुकस्य दुराचारं निशम्य रामकृष्णौ तत्र गतौ। फलानां पातस्य ध्वनिमाकर्ण्य प्रहरन्तं धेनुकं तस्य सहायकैः समं वीरौ तावचिरेणैवाऽहताम्।

यथा गर्दभा घोटका वा चलन्ति तथैव धेनुकोऽपि हस्ताभ्यां चरणाभ्यां चाऽचलत्। गर्दभा यथा हेषन्ति, तथैव हेषन् स फलान्यत्तुमागतान् नृनत्रासयत्। अतोऽपि तस्य गर्दभत्वेन प्रसिद्धिरासीत्।

कठिनशब्दार्थाः

१ निबर्हणः	(adj.) killer	मारनेवाला
२ तालः	(noun mas.) palmyra tree	ताल-वृक्ष
३ सुरभिः	(adj. neu.) fragrant	सुगन्धित
४ विषूचीनः	(adj.) spreading everywhere	सर्वत्र व्याप्त
५ मतंगजः	(noun mas.) elephant	हाथी
६ ओजः	(noun neu.) strength	बल
७ नगः	(noun mas.) mountain	पर्वत
८ तरः	(noun neu.) speed	वेग
९ प्रत्यक्	(Adv.) behind	पीछे की ओर
१० पराक्	(Adv.) forepart	आगे की ओर
११ काशब्दः	(noun mas.) harsh sound	बुरी ध्वनि
१२ संरब्धः	(adj. mas.) angry	क्रुद्ध
१३ उपक्रोष्टा	(adj. mas.) crying	चिल्लानेवाला
१४ रुट्	(noun fem.) wrath	क्रोध
१५ तृणराजः	(noun mas.) tree	वृक्षः
१६ वेपमानः	(adj. mas.) trembling, shaking	कांपता हुआ
१७ प्रकरः	(noun mas.) heap	राशि
१८ अनुगाः	(adj. mas.) followers	पीछे चलनेवाले

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नवविंशः पाठः

राम-चरितम्

आश्विने मासे प्रायः प्रतिवर्षं बालका रामलीलां प्रेक्षन्ते। लीलायाः कथाऽत्र संक्षिप्य वर्ण्यते। रामस्य पिता दशरथ आसीत्

स पुण्य-कीर्त्तिः शतमन्युकल्पो
महेन्द्रलोकप्रतिमां समृद्ध्या।
अध्यास्त सर्वर्त्तुसुखामयोध्या-
मध्यासितां ब्रह्मभिरिद्ध-बोधैः॥

तं दशरथं कौशिक एकदा स्वयज्ञरक्षायै रामलक्ष्मणावयाचत। तौ भ्रातरौ मुनिना साकमाश्रमं गतवन्तौ तत्र विघ्नकरान्निशाचरानतितिग्मैरिषुभिर्यमपुरीं प्राहिणुताम्। अथ जनकाल्लब्धनिमन्त्रणो मुनिवरो राजपुत्राभ्यां सह मिथिलामव्रजत्। तत्र रामस्य बलं परीक्षमाणेन मिथिलाधीशेन प्रार्थितोऽसौ पिनाकं लीलयाऽभनक्।

ततो नदीष्णान् पथिकान् गिरिज्ञान्
आह्वायकान् भूमिपतेरयोध्याम्।
दित्सुः सुतां योधहरैस्तुरङ्गैः
व्यसर्जयन्मैथिल-मर्त्य-मुख्यः॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्षिप्रं ततो ऽध्वन्य-तुरंग-यायी
यविष्ठवद् वृद्धतमोऽपि राजा ।
आख्यायकेभ्यः श्रुतसूनुवृत्तिः
अग्लानयानो मिथिलामगच्छत् ॥

संपन्नं च विवाह - कृत्यं परया मुदा । कृतोद्वाहो रामोऽयोध्यां प्रत्यावर्त्तमानः पथि परशुरामेण बल-परीक्षायै प्रत्तं चापमप्याकर्षत् । सुखं चावसत् सह भ्रातृभिर्मातृभिः पित्राऽन्येन च परिवारेणाऽयोध्यायाम् ।

अथ रामं यौवराज्येऽभिषेक्तुमनसं दशरथं मन्थरया प्रतारिता कैकेयी भरतस्य राज्यं रामस्य च वनवास-मयाचत ।

रामः पित्रादेशं मन्वानः ससीतः सहलक्ष्मणश्च विपिनं गतः । पुत्र-वियोग-शुचमसहमानो नृपो दिवमगच्छत् । भरतश्चाहूतो मन्त्रिभिर्मातामहगृहादयोध्यामागच्छत् ।

रामं वनात् प्रत्यानेतुमिच्छन्भरतः सपरिजनो वनाय प्रातिष्ठताऽमिलच्चाग्रजेन चित्रकूटे । अनुजेनायोध्यां प्रतिगन्तुं प्रार्थितो रामोऽब्रवीत् ।

"अरण्ययाने सुकरे पिता मां
प्रायुंक्त राज्ये बत दुष्करे त्वाम् ।
कृतो श्रुती वृद्धमतेषु धीमान्
त्वं पैतृकं चेद् वचनं न कुर्याः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विच्छिद्यमानेऽपि कुले परस्य
पुंसः कथं स्यादिह पुत्र-काम्या ॥



भरतः वनात् प्रत्यानेतुं रामं प्रार्थयते

अस्माकमुक्तं बहु मन्यसे चेद्
यद्दीशिषे त्वं न मयि स्थिते च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जिह्रेष्यतिष्ठन् यदि तात-वाक्ये
जहीहि शंकां व्रज शाधि पृथ्वीम्
च्युत-निखिल-विशंकः पूज्यमानो जनौघैः
सकलभुवनराज्यं कारयाऽस्मन्मतेन ॥"

तच्छ्रुत्वा भरतो रामस्य पादुके गृहीत्वा स्व-पुरीं प्रत्यागच्छत् ।

रामश्च वने चतुर्दशवर्षाण्यवसत् । एकदा भ्रात्रो रनुपस्थितौ रावणः सीतां लंकामहरत् । तदनन्तरं ता मन्वेषयन्तौ राम-लक्ष्मणौ हनुमत्सचिवस्य सुग्रीवस्य सहायतया सीताया उदन्तं विज्ञाय सरिदीशे सेतुं निर्माप्य रिपोः पुरीमवारुन्धाम् । युद्धे च ससैन्यं शत्रुं विजित्य जानकीमादाय पुष्पकेण स्वां नगरीमागतौ ।

अथ रामश्चिरमयोध्यां धर्म्मेणाशात् ।

[पद्यांशो भट्टिकाव्यात्]

पद्यांशे प्रयुक्तानां क्रियाणां विवरणम्

१ अध्यास्त
अधि+आस् [अदादिगण आत्मनेपदम्] धातोर्लङि प्रथमपुरुष-एकवचनम् ।

२ व्यसजयत्
वि+सृज् [तुदादिगणे परस्मैपदम्] धातोः प्रेरणार्थके लङि प्रथमपुरुष-एकवचनम् ।

३ अगच्छत्
गम् [भ्वादिगणे परस्मैपदम्] धातोर्लङि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४ प्रायुंक्त
प्र+युज् [रुधादिगण आत्मनेपदम्] धातोर्लङि प्रथमपुरुषैकवचने।

५ कुर्याः
कृ (तनादिगणे परस्मैपदम्) धातोर्लिङि मध्यमपुरुषएकवचनम्।

६ स्यात्
अस् (अदादिगणे परस्मैपदम्) धातोर्लिङि प्रथमपुरुषएकवचनम्।

७ मन्यसे
मन् (दिवादिगण आत्मनेपदम्) धातोर्लटि मध्यमपुरुषैकवचनम्।

८ ईशिषे
ईश् to rule (अदादिगण आत्मनेपदम्) धातोर्लटि मध्यमपुरुषैकवचनम्। ईष्टे ईशाते ईशते। ईशिषे ईशाथे ईशिध्वे। ईशे ईश्वहे ईश्महे।

९ जिह्रेषि
ही to be ashamed (जुहोत्यादिगणे परस्मैपदम्) धातोर्लटि मध्यमपुरुषएकवचनम्। जिह्रेति जिह्रीतः जिह्रियति। जिह्रेषि जिह्रीथः जिह्रीथ। जिह्रेमि जिह्रीवः जिह्रीमः।

१० जहीहि
हा to leave (जुहोत्यादिगणे परस्मैपदम्) धातोर्लोटि मध्यमपुरुषैकवचनम्। जहातु जहीताम् जहतु। जहीहि जहीतम् जहीत। जहानि जहाव जहाम।

११ शाधि
शास् (अदादिगणे परस्मैपदम्) धातोर्लोटि मध्यमपुरुषैकवचनम्।

१२ कारय
कृ (तनादिगण परस्मैपदम्) धातोः प्रेरणार्थके लोटि मध्यमपुरुषैकवचनम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्रिंशः पाठः

महाभारते-यक्ष युधिष्ठिर-संवादः

यक्ष उवाच—

केनस्विच्छ्रोत्रियो भवति केनस्विद् विन्दते महत् ।
केनस्विद्द्वितीयवान् भवति राजन् केन च बुद्धिमान् ॥

युधिष्ठिर उवाच—

श्रुतेन श्रोत्रियो भवति तपसा विन्दते महत् ।
धृत्या द्वितीयवान् भवति बुद्धिमान् वृद्धसेवया ॥

यक्ष उवाच—

किं ब्राह्मणानां देवत्वं कश्च धर्मः सतामिव ।
कश्चैषां मानुषो भावः किमेषामसतामिव ॥

युधिष्ठिर उवाच—

स्वाध्याय एषां देवत्वं तप एषां सतामिव ।
मरणं मानुषो भावः परिवादोऽसतामिव ॥

यक्ष उवाच—

किंस्विद्गुरुतरं भूमेः किंस्विदुच्चतरं च खात् ।
किंस्विच्छीघ्रतरं वायोः किंस्विद् बहुतरं तृणात् ॥

युधिष्ठिर उवाच—

माता गुरुतरा भूमेः खात् पितोच्चतरस्तथा ।
मनश्शीघ्रतरं वाताच्चिन्ता बहुतरा तृणात् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यक्ष उवाच—

किंस्वित् प्रसवतो मित्रं किंस्विन् मित्रं गृहे सतः ।
आतुरस्य च किं मित्रं किंस्विन् मित्रं मरिष्यतः ॥

युधिष्ठिर उवाच—

सार्थः प्रसवतो मित्रं भार्या मित्रं गृहे सतः ।
आतुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः ॥

यक्ष उवाच—

मृतः कथं स्यान् पुरुषः कथं राष्ट्रं मृतं भवेत् ।
श्राद्धं मृतं कथं वा स्याद् कथं यज्ञो मृतो भवेत् ॥

युधिष्ठिर उवाच—

मृतो दरिद्रः पुरुषो मृतं राष्ट्रमराजकम् ।
मृतमश्रोत्रियं श्राद्धं मृतो यज्ञस्त्वदक्षिणः ॥

यक्ष उवाच—

किं ज्ञानं प्रोच्यते राजन् कः शमश्च प्रकीर्त्तितः ।
दया च का परा प्रोक्ता किं चार्जवमुदाहृतम् ॥

युधिष्ठिर उवाच—

ज्ञानं तत्त्वार्थसंबोधः शमश्चित्तप्रशान्तता ।
दया सर्वसुखैषित्वमार्जवं समचिन्तता ॥

यक्ष उवाच—

कः शत्रुर्दुर्जयः पुंसां कश्च व्याधिरनन्तकः ।
कीदृशश्च भवेत् साधुरसाधुः कीदृशः स्मृतः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

युधिष्ठिर उवाच—

क्रोधः सुदुर्जयः शत्रुर्लोभो व्याधिरनन्तकः ।
सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः ॥

एकत्रिंशः पाठः

ययातिचरितम्

नहुषस्य षट् पुत्रा महाबलपराक्रमा बभूवुः । ययातिर्नाम तस्य पुत्रो भूभृदभवत् । अकालेनैव ययातिर्जरामवाप । स्वजरां संक्रमयितुं ज्येष्ठं पुत्रमुवाच । वत्स, अकालेनैव जरा मामुपस्थिता । तामहं भवतः संचारयामि । नात्रभवता प्रत्याख्यानं कर्तव्यम् । इत्युक्ते स ज्येष्ठपुत्रः तां जरामादातुं नैच्छत् । अथ कनीयांसं पुत्रं तथैवाह । स चातिप्रवणमतिः सबहुमानं पितरं प्रणम्य जरां जग्राह । स्वकीयं च यौवनं स्वपित्रे ददौ । सोऽपि यौवनमासाद्य विषयांश्चचार । तथाप्यनुदिनं तस्य तृष्णा वृद्धिं प्राप्ता । अथ तस्य मनसि विचारः समुत्पन्नः ।

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्तते ॥
तस्मात्तृष्णामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ।
निर्द्वन्द्वो निर्ममो भूत्वा चरिष्यामि मृगैः सह ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्वात्रिंशः पाठः

रामायणे वर्षा-वर्णनम्

अयं स कालः संप्राप्तः समयोऽद्य जलागमः ।
संपश्य त्वं नभो मेघैः संवृतं गिरिसंनिभैः ॥१॥
क्वचित्प्रकाशं क्वचिदप्रकाशम्
नभः प्रकीर्णाम्बुधरं विभाति ।
क्वचित्क्वचित्पर्वतसंनिरुद्धम्
रूपं यथा शान्तमहार्णवस्य ॥२॥
विद्युत्पताकाः सबलाकमालाः
शैलेन्द्रकूटाकृतिसंनिकाशाः ।
गर्जन्ति मेघाः समुदीर्णनादा
मत्ता गजेन्द्रा इव संयुगस्थाः ॥३॥
समुद्वहन्तः सलिलातिभारम्
बलाकिनो वारिधरा नदन्तः ।
महत्सु शृङ्गेषु महीधराणाम्
विश्रम्य विश्रम्य पुनः प्रयान्ति ॥४॥
वर्षप्रवेगा विपुलाः पतन्ति
प्रवान्ति वाताः समुदीर्णवेगाः ।
प्रनष्टकूलाः प्रवहन्ति शीघ्रं
नद्यो जलं विप्रतिपन्नमार्गाः ॥५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वनोपगूढं गगनं न तारा
न भास्करो दर्शनमभ्युपैति ।
नवैर्जलौघैर्धरणी वितृप्ता
तमोविलिप्ता न दिशः प्रकाशाः ॥६॥

त्रयस्त्रिंशः पाठः

रामायणे पम्पासरोवर्णनम्

स तां पुष्करिणीं गत्वा पद्मोत्पलझषाकुलाम् ।
रामः सौमित्रिसहितो विललापाकुलेन्द्रियः ॥१॥
राम उवाच—सौमित्रे शोभते पम्पा वैदूर्यविमलोदका ।
फुल्लपद्मोत्पलवती शोभिता विविधैर्द्रुमैः ॥२॥
सौमित्रे पश्य पम्पायाः काननं शुभदर्शनम् ।
यत्र राजन्ति शैला वा द्रुमाः सशिखरा इव ॥३॥
अधिकं प्रविभात्येतन्नीलपीतं तु शाद्वलम् ।
द्रुमाणां विविधैः पुष्पैः परिस्तोमैरिवार्पितम् ॥४॥
पुष्पभारसमृद्धानि शिखराणि समन्ततः ।
लताभिः पुष्पिताग्राभिरुपगूढानि सर्वतः ॥५॥
पश्य रूपाणि सौमित्रे वनानां पुष्पशालिनाम् ।
सृजतां पुष्पवर्षाणि वर्षं तोयमुचामिव ॥६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः ।
वायुवेगप्रचलिताः पुष्पैरवकिरन्ति गाम् ॥७॥
पतितैश्च पतद्भिश्च पादपस्थैश्च मारुतः ।
कुसुमैः पश्य सौमित्रे क्रीडतीव समन्ततः ।८॥
स एव सुखसंस्पर्शो वाति चन्दनशीतलः ।
गन्धमभ्यावहन् पुण्यं श्रमापनयनोऽनिलः ॥९॥
पश्य शीतजलां चेमां सौमित्रे पुष्करायुताम् ।
चक्रवाकानुचरितां कारण्डवनिषेवितां ॥
प्लवैः क्रौञ्चैश्च संपूर्णां महामृगनिषेवितां ।
अधिकं शोभते पम्पा विकूजद्भिर्विहङ्गमैः ॥१०-११॥

चतुस्त्रिंशः पाठः

दूतवाक्यम्

सूत्रधारः—एवमार्यमिश्रान् विज्ञापयामि । अये किन्नु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग । पश्यामि ।

(नेपथ्ये)

भो भोः प्रतिहाराधिकृताः । महाराजो दुर्योधनः समाज्ञापयति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सूत्रधारः—भवतु। विज्ञातम्।

उत्पन्ने धार्तराष्ट्राणां विरोधे पाण्डवैः सह।
मन्त्रशालां रचयति भृत्यो दुर्योधनाज्ञया॥

(निष्क्रान्तः)

(ततः प्रविशति काञ्चुकीयः)

काञ्चुकीयः—भो भोः प्रतिहाराधिकृतः। महाराजो दुर्योधनः समाज्ञापयति। अद्य सर्वैः पार्थिवैः सह मन्त्रयितुमिच्छामि। तदाहूयन्तां सर्वे राजान इति (परिक्रम्यावलोक्य च) अये अयं महाराजो दुर्योधन इत एवाभिवर्तते।

(ततः प्रविशति यथानिर्दिष्टो दुर्योधनः)

काञ्चुकीयः (प्रविश्य) जयतु महाराजः। महाराजशासनात् समानीतं सर्वराजमण्डलम्।

दुर्योधनः—सम्यक् कृतम्। प्रविश त्वमवरोधनम्

काञ्चुकीयः—यदाज्ञापयति महाराजः (निष्क्रान्तः)

दुर्योधनः—आर्यौ वैकर्णवर्षदेवौ। उच्यताम्। अस्ति ममैकादशाक्षौहिणीबलसमुदयः। अस्य कः सेनापतिर्भवितुमर्हति। किमाहतुर्भवन्तौ? महान् खल्वयमर्थः। मन्त्रयित्वा वक्तव्यमिति। सदृशमेतत्। तदागम्यताम्। मन्त्रशालामेव प्रविशामः। आचार्य! अभिवादये। प्रविशतु भवान् मन्त्रशालाम्। पितामह! अभिवादये प्रविशतु भवान्। आर्यौ वैकर्णवर्षदेवौ! प्रविशेतां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भवन्तौ। भो भोः सर्वक्षत्रियाः! स्वैरं प्रविशन्तु भवन्तः। वयस्य कर्ण प्रविशावस्तावत्। (प्रविश्य) आचार्य! एतत् कूर्मासनमास्यताम्। पितामह! एतत्सिंहासनम् आस्यताम्। मातुल! एतच्चर्मासनम् आस्यताम्। आर्यौ वैकर्णवर्षदेवौ! आसातां भवन्तौ। भो भोः सर्वक्षत्रियाः! स्वैरमासतां भवन्तः (शब्दः श्रूयते) "किमिति किमिति महाराजो नासते। अहो सेवाधर्म" इति। नन्वयमहमासे। वयस्य कर्ण त्वमप्यास्व। (उपविश्य) आर्यौ वैकर्णवर्षदेवौ। उच्यताम्। अस्ति ममैकादशाक्षौहिणीबलसमुदयः। अस्य कः सेनापतिर्भवितुमर्हतीति। किमाहतुर्भवन्तौ? "अत्रभवान् गान्धारराजो वक्ष्यतीति"। भवतु। मातुलेनाभिधीयताम्। किमाह मातुलः 'अत्रभवति गाङ्गेये स्थिते कोऽन्यः सेनापतिर्भवितुमर्हतीति? सम्यगाह मातुलः। भवतु भवतु। पितामह एव भवतु। वयमप्येतदभिलषामः।

सेना-निनाद-पटह-स्वन-शङ्खनादैः
चण्डानिलाहत-महोदधिनादकल्पैः।
गाङ्गेयमूर्ध्नि पतितैरभिषेकतोयैः
संधिं पतन्तु हृदयानि नराधिपानाम्॥

काञ्चुकीयः (प्रविश्य) जयतु महाराजः। एष खलु पाण्डव-स्कन्धावाराद् दौत्येनागतः पुरुषोत्तमो नारायणः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दुर्योधनः—मा तावद् भो बादरायण। किं कंसभृत्यो दामोदरस्तव पुरुषोत्तमः! स गोपालकस्ते पुरुषोत्तमः! आ अपध्वंस।

काञ्चुकीयः—प्रसीदतु महाराजः। सम्भ्रमेण समुदाचारो विस्मृतः (पादयोःपतति)

दुर्योधनः—सम्भ्रम इति। मनुष्याणामस्त्येव सम्भ्रमः। उत्तिष्ठोत्तिष्ठ।

काञ्चुकीयः—अनुगृहीतोऽस्मि।

दुर्योधनः—इदानीं प्रसन्नोऽस्मि। क एष दूतः प्राप्तः।

काञ्चुकीयः—दूतः प्राप्तः केशवः।

दुर्योधनः—केशव इति। अयमेव समुदाचारः। भो भो राजानः दौत्येनागतस्य केशवस्य किं युक्तम्। किमार्घ्यवन्तः। अर्घ्यप्रदानेन पूजयितव्यः केशव इति न मे रोचते। ग्रहणमस्यात्र हितं पश्यामि। अपि च योऽयं केशवस्य प्रत्युत्थास्यति स मया द्वादशसुवर्णभारेण दण्ड्यः। तदप्रमत्ता भवन्तु भवन्तः। बादरायण! आनीयतां स दूतः।

काञ्चुकीयः—यदाज्ञापयति महाराजः (निष्क्रान्तः) (ततः प्रविशति वासुदेवः काञ्चुकीयश्च)

वासुदेवः—भो बादरायण किं प्रवेष्टव्यम्?

काञ्चुकीयः—अथ किम्। प्रवेष्टुमर्हति पद्मनाभः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वासुदेवः—(प्रविश्य) कथं मां दृष्ट्वा सम्भ्रान्ताः सर्वक्षत्रियाः।
अलमलं सम्भ्रमेण। स्वैरमासतां भवन्तः।

दुर्योधनः—अलमलं सम्भ्रमेण।

वासुदेवः—(उपगम्य) भोः सुयोधन। किमास्से।

दुर्योधनः—(आसनात् पतित्वा आत्मगतम्) सुव्यक्तं प्राप्त एव केशवः (प्रकाशम्) भो दूत एतदासनमास्यताम्।

वासुदेवः—आचार्य! आस्यताम्। स्वैरमासतां भवन्तः। वयमप्युपविशामः।

दुर्योधनः—भो दूत! सर्वे पाण्डवाः सकुशलाः।

वासुदेवः—अथ किम्। कुशलिनः सर्वे। भवतः कुशलं पृष्ट्वा विज्ञापयन्ति युधिष्ठिरादयः पाण्डवाः।

अनुभूतं महद्दुःखं सम्पूर्णः समयः स च।
अस्माकमपि धर्म्यं यद्दायाद्यं तद् विभज्यताम्॥

दुर्योधनः—कथं कथं दायाद्यमिति।

वासुदेवः—मा मा भवान्। एवं परस्परविरोधवर्धनेन शीघ्रं कुरुकुलं नामशेषं भवेत्।

कर्तव्यो भ्रातृषु स्नेहः विस्मर्तव्या गुणेतराः।
सम्बन्धो बन्धुभिः श्रेयान् लोकयोरुभयोरपि॥

किं बहुना—राज्यार्धं पाण्डवेभ्यो दातुमर्हति भवान्। अन्यथा पाण्डवाः सागरान्तां गां स्वयमेव हरिष्यन्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दुर्योधनः—कथं कथम् ! स्वयमेव हरिष्यन्ति पाण्डवाः ! त्वद्-
वचोभिर्न दास्ये ।

वासुदेवः—गच्छामि तावत् ।

दुर्योधनः—गच्छ गच्छ । विफलीकृतः कालः ।

वासुदेवः—भो दुर्योधन ! त्वदर्थात् कुरुवंशोऽयमचिरान्नाश-
मेष्यति ।

पञ्चत्रिंशः पाठः

संकीर्णपद्यानि

उदये सविता रक्तो रक्तश्चास्तमने तथा ।
संपत्तौ च विपत्तौ च महतामेकरूपता ॥१॥
सन्तः स्वतः प्रकाशन्ते गुणा न परतो नृणाम् ।
आमोदो नहि कस्तूर्याः शपथेन विभाव्यते ॥२॥
किमत्र चित्रं यत् सन्तः परानुग्रहतत्पराः ।
नहि स्वदेहशैत्याय जायन्ते चन्दनद्रुमाः ॥३॥
काकैः सह प्रवृद्धस्य कोकिलस्य कलागिरः ।
खलसङ्गेऽपि नैष्ठुर्यं कल्याणप्रकृतेः कुतः ॥४॥
उपकर्तुं प्रियं वक्तुं कर्तुं स्नेहमकृत्रिमम् ।
सुजनानां स्वभावोऽयं केनेन्दुः शिशिरीकृतः ॥५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥६॥
आमरणान्ताः प्रणयाः कोपास्तत्क्षणभङ्गुराः ।
परित्यागाश्च निःसङ्गा भवन्ति हि महात्मनाम् ॥७॥
आपत्स्वेव हि महतां शक्तिरभिव्यज्यते न संपत्सु ।
अगुरोस्तथा न गन्धः प्रागस्ति यथाग्निपतितस्य ॥८॥
शरदि न वर्षति गर्जति, वर्षति वर्षासु निःस्वनो मेघः ।
नीचो वदति न कुरुते, न वदति सुजनः करोत्येव ॥९॥
त्याग एको गुणः श्लाघ्यः किमन्यैर्गुणराशिभिः ।
त्यागाज्जगति पूज्यन्ते पशुपाषाणपादपाः ॥१०॥
लोभः प्रतिष्ठा पापस्य प्रसूतिर्लोभ एव च ।
द्वेषक्रोधादिजनको लोभः पापस्य कारणम् ॥११॥
अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥१२॥
कर्णस्त्वचं शिविर्मांसं जीवं जीमूतवाहनः ।
ददौ दधीचिरस्थीनि नास्त्यदेयं महात्मनाम् ॥१३॥
परोपकारः कर्तव्यः प्राणैरपि धनैरपि ।
परोपकारजं पुण्यं न स्यात् क्रतुशतैरपि ॥१४॥
धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।
तन्निमित्तो वरं त्यागो विनाशे नियते सति ॥१५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम् ॥१६॥

पद्माकरं दिनकरो विकचं करोति
चन्द्रो विकासयति कैरवचक्रवालम् ।
नाभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहितेषु कृतातियोगाः ॥१७॥

सर्वत्र संपदस्तस्य संतुष्टं यस्य मानसम् ।
उपानद्गूढपादस्य ननु चर्मावृतैव भूः ॥१८॥

वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या
सम इह परितोषो निर्विशेषो विशेषः ।
स हि भवति दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ॥१९॥

चलन्ति गिरयः कामं युगान्तपवनाहताः ।
कृच्छ्रेऽपि न चलत्येव धीराणां निश्चलं मनः ॥२०॥

कामं प्रियानपि प्राणान् विमुञ्चन्ति मनस्विनः ।
इच्छन्ति न त्वमित्रेभ्यो महतीमपि सत्क्रियाम् ॥२१॥

गुणाः कुर्वन्ति दूतत्वं दूरेऽपि वसतां सताम्
केतकीगन्धमाघ्राय स्वयं गच्छन्ति षट्पदाः ॥२२॥

गुणैर्गौरवमायाति न महत्यापि संपदा ।
पूर्णेन्दुर्नतथा वन्द्यो निष्कलङ्को यथा कृशः ॥२३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।
षडेते यत्र वर्तन्ते तत्र देवः सहायकृत् ॥२४॥

संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि ।
तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः ॥२५॥

क्षमा बलमशक्तानां शक्तानां भूषणं क्षमा ।
क्षमा वशीकृतिर्लोके क्षमया किं न सिद्ध्यति ॥२६॥

चन्दनं शीतलं लोके चन्दनादपि चन्द्रमाः ।
चन्द्रचन्दनयोर्मध्ये शीतला साधुसंगतिः ॥२७॥

महाजनस्य संसर्गः कस्य नोन्नतिकारकः ।
पद्मपत्रस्थितं वारि धत्ते मुक्ताफलश्रियम् ॥२८॥

यस्य मित्रेण संभाषा यस्य मित्रेण संस्थितिः ।
मित्रेण सह यो भुङ्क्ते ततो नास्तीह पुण्यवान् ॥२९॥

शुचित्वं त्यागिता शौर्यं सामान्यं सुखदुःखयोः
दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्गुणाः ॥३०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शब्दकोषः

प्रथमः पाठः

वागी	n. fem	सरस्वती	Goddess of Learning
अन्तेवासी	adj	विद्यार्थी	student
विषयः	n. mas	विषय	subject
परस्परम्	adv	आपस में	among themselves
पन्थाः	n. mas	मार्ग	path
छात्रालयः	n. mas	बोर्डिंगहाउस	boarding house
अद्यत्वे	adv	आज-कल	these days
सम्यक्	adv	अच्छी तरह	well
वेत्रः	n. mas	बेंत	cane
रुग्णः	adj	बीमार	ill, sick
चिंचा	n. fem	इमली (कटारे)	tamarind
नैरुज्यम्	n. neut	स्वास्थ्य	health
रसायनम्	n. neut	बलदायक औषध	tonic

द्वितीयः पाठः

तारः	adj	ऊँचा	loud
कज्जलम्	n. neut	काजल	soot
अम्बा	n. fem	माता	mother
मघवा	n. mas	इन्द्र	Chief of the gods
विडाल	n. mas	बिलाव	cat
खिंखिरः	n. mas	लोमड़ी	fox
भीकरः	adj	डरानेवाला	fearful
अभिप्रायः	n. mas	मतलब	sense
पारिषदः	adj	सभ्य	member of the Court

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तापसः	adj	तपस्वी	hermit
रहस्यम्	n. neut	गुप्त बात	something mysterious
मृधम्	n. neut	युद्ध	battle
मारकती	adj	पन्ने की बनी	made of emerald

तृतीयः पाठः

असवः	n. mas	प्राण	life
स्वान्तम्	n. neut	चित्त	mind
दरः	n. mas	डर	fear
वसु	n. neut	धन	wealth
रिक्थम्	u. neut	धन	wealth
भूरि	adj	बहुत	much
पुष्कलम्	adj	बहुत	much
हेम	n. neut	सुवर्ण	gold
लिप्सा	n. fem	पाने की इच्छा	desire to gain

चतुर्थः पाठः

कोष्ठः	n. mas	कोठा	inner apartment
शिक्यम्	n. neut	छीका	a swing or sling made of ropes
उन्दुरुः	n. mas	मूसा	mouse
निष्कुटः	n. mas	घर का बगीचा	orchard
सभिकः	n. mas	जुआ खेलानेवाला	keeper of a gaming house
कितवः	n. mas	धूर्त्त	rogue

पञ्चमः पाठः

उभयतः	adv	दोनों ओर	on both sides
अनु	adv	पीछे	after
अन्तरा	adv	बीच में	between

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अभितः	adv	सामने	in front of
निकषा	adv	निकट	near
अन्तरेण	adv	बिना	without
परितः	adv	चारों ओर	around
सर्वतः	adv	सब ओर	on all sides
धिक्	adv	धिक्कार	interjection indicating woe and shame
चिकित्सालयः	n. mas	अस्पताल	hospital
अद्भुतालयः	n. mas	अजायबघर	museum
शिरस्त्राणम्	n. neut	सिर का टोप	helmet
आतुरः	adj	बीमार	sick
परिखाः	n. fem	खाई	ditch

षष्ठः पाठः

पुरा	adv	प्राचीनकाल में	in ancient times
प्रकृतिः	n. fem	स्वभाव	nature
वाजी	n. mas	घोड़ा	horse
बधिरः	adj	बहरा	deaf
सपर्या	n. fem	आदर-सत्कार	reception, worship
अक्षाः	n. mas	जुआ खेलने के पासे	dice
सारथ्यम्	n. neut	कोचवानी	driver's job
व्याजः	n. mas	बहाना	pretext

सप्तमः पाठः

सुप्रभातम्	n. neut	प्रातःकालीन अभिवादन	Good morning
वास्तुकम्	n. neut	बथुआ	a green leafy vegetable
वेसवारः	n. mas	मसाला	spice
महिषी	n. fem	भैंस	she-buffalo
पयस्विनी	adj	दुधारू गौ	milch cow

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ईर्ष्या	n. fem	पराभ्युदय की असहिष्णुता, हसद	jealousy
असूया	n. fem	गुणों में दोषदर्शन	finding fault with other's merits

अष्टमः पाठः

पत्तनम्	n. neut	नगर	town
घण्टापथः	n. mas	सड़क	road
प्राक्	adv	पूर्व में	towards east
अङ्गना	n. fem	स्त्री	woman
ऋते	adv	बिना	without
आरात्	adv	निकट	near
सोपानम्	n. neut	ज़ीना	staircase
हर्म्यम्	n. neut	हवेली	mansion
अम्बरम्	n. neut	वस्त्र	cloth
मौनम्	adv	चुपचाप	silently
बाष्पः	n. mas	आँसू	tear
गद्गदः	adj	रुका हुआ	choked
प्रसूः	n. fem	माता	mother
पृथक्	adv	जुदा	separately

नवमः पाठः

वृन्दा	n. fem	तुलसी	holy basil
पंचकृत्वः	adv	पाँच बार	five times
पौगण्डम्	n. neut	शैशव और किशोर के बीच की अवस्था	boyhood
केलिः	n. fem	क्रीडा	sport
हैयङ्गवीनम्	n. neut	मक्खन	butter

दशमः पाठः

उपधानम्	n. neut	तकिया	pillow
कटः	n. mas	चटाई	mat

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पटच्चरम्	n. neut	फटा कपड़ा	torn cloth
कन्था	n. fem	भिक्षु का वस्त्र	wallet
निस्स्वः	adj	दरिद्र	poor
प्रशंसा	n. fem	तारीफ़	praise
वातायनम्	n. neut	खिड़की	window
गवाक्षः	n. mas	झरोखा	air-hole
झंझा	n. fem	आँधी-मेंह	storm with showers
पृषत्	n. neut	बूंद	drop
प्रभञ्जनः	n. mas	आँधी	wind
विवस्वान्	n. mas	सूर्य	sun
आसारः	n. mas	धारा	torrent

एकादशः पाठः

पद्धतिः	n. fem	मार्ग	path
विपश्चित्	adj	बुद्धिमान्	intelligent
अम्बु	n. neut	पानी	water
शाटिका	n. fem	साड़ी	saree
कौशेयी	adj	रेशमी	silken
प्रसभम्	adv	बलात्	forcibly

द्वादशः पाठः

नाडी	n. fem	नाड़ी	pulse
चक्रमर्दः	n. mas	करौंदा	a fruit
टबबोजः	n. mas	बेर	plum
चषकः	n. mas	प्याला	cup
अमेध्यः	adj	अपवित्र	impure
सेवती	n. fem	गुलाब	rose
मल्लिका	n. fem	चमेली	jasmine

त्रयोदशः पाठः

किंनृपः	n. mas	बुरा राजा	bad king
संसत्	n. fem	सभा	court

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सेनका	n. fem	एक अप्सरा	a celestial nymph
प्रासादः	n. mas	महल	palace

चतुर्दशः पाठः

प्लक्षः	n. mas	पिलखन	a tree
न्यग्रोधः	n. mas	बड़	banyan tree
अहिः	n. mas	साँप	snake
नकुलः	n. mas	न्यौला	mangoose
बटुः	n. mas	लड़का, ब्रह्मचारी, विद्यार्थी	student, boy
उपानत्	n. fem	जूता	shoe
गोमयः	n. mas	गोबर	cowdung
स्तनः	n. mas	थन	udder
वक्त्रम्	n. neut	मुख	mouth
फेनः	n. mas	झाग	foam, froth
गोचरभूमिः	n. fem	गायों के चरने का मैदान	pasture

पंचदशः पाठः

शष्पम्	n. neut	दूब	grass
बहुलः	adj	अधिक	much
द्विपः	n. mas	हाथी	elephant
गोमायुः	n. mas	गीदड़	jackal
अरण्यानी	n. fem	घना वन	dense forest
हुंकृतम्	n. neut	गर्जन	roar
किंकर्त्तव्यविमूढः	adj	परेशान	at wit's end
पंचास्यः	n. mas	शेर	lion
लक्ष्म	n. neut	चिह्न	mark
प्रत्यग्रः	adj	नवीन	new
बालधिः	n. mas	पूँछ	tail
हर्यक्षः	n. mas	शेर	lion

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वेपथुः	n. mas	कम्प	tremor
कलेवरम्	n. neut	शरीर	body
अंघ्रिः	n. mas	पैर	foot

षोडशः पाठः

कोटः	n. mas	क़िला	fort
दुर्गं	n. neut	क़िला	fort
आयतनम्	n. neut	इमारत	building
प्रस्तरः	n. mas	पत्थर	stone
स्तम्भः	n. mas	खम्भा	pillar
ऋद्धिः	n. fem	धन	wealth
पुष्करिणी	n. fem	तालाब	pond, tank
भ्रंशः	n. mas	बिगाड़; टूट फूट	wear and tear
आपणः	n. mas	दूकान	shop
सुधा	n. fem	चूना	lime
राका	n. fem	पूर्णिमा	full moon night

सप्तदशः पाठः

शासकः	adj	राजा	ruler
अवाची	adj	दक्षिण	south
प्राची	adj	पूर्व	east
प्रतीची	adj	पश्चिम	west
उदीची	adj	उत्तर	north
करदः	adj	कर देनेवाला	one who pays tax
उपायनम्	n. neut	भेंट	a present
जन्यम्	n. neut	युद्ध	battle
अच्छोदः	adj	निर्मल जलवाला	having clear water
प्रेष्ठः	adj	सर्वाधिक प्रिय	dearest

अष्टादशः पाठः

उदवसितम्	n. neut	घर	house
वरासनम्	n. neut	अच्छी जगह	good seat

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पूगीफलम्	n. neut	सुपारी	betel-nut
सुमनाः	adj	अच्छे मनवाला	generous minded
सुमनः	n. neut	पुष्प	flower
आरामः	n. mas	बगीचा	garden
पतंगः	n. mas	तितली	butterfly
व्रततिः	n. fem	बेल	creeper

नवदशः पाठः

पाद्यम्	n. neut	पैर धोने के लिए जल	water to wash feet
अर्घ्यम्	n. neut	हाथ धोने के लिए जल	water to wash hands
प्राञ्जलिः	adj	हाथ जोड़े हुए	with folded hands
प्रयतः	adj	इन्द्रियनिग्रही	keeping organs under restraint
विमर्शः	n. mas	विचार	contemplation
कदम्बकः	n. mas	समूह	multitude
दृप्तः	adj	अभिमानी	arrogant
काकपक्षः	n. mas	जुल्फ	side locks of hair on the temples
विनिग्रहः	n. mas	अधिकार में करना	subjection
इरिणम्	n. neut	ऊसर भूमि	barren soil
मृगाक	n. mas	मृग	deer

विंशः पाठः

सहकारः	n. mas	सुगन्धित आम	sweet scented mango
करण्डः	n. mas	टोकरी	basket
अष्ठीला	n. fem	गुठली	stone of a fruit

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एकविंशः पाठः

कूटम्	n. neut.	राशि	heap
आगः	n. neut	अपराध	fault
आयतिः	n. fem	भविष्य	future
मुहूर्त्तः	n. mas	पौन घण्टे के लगभग	48 minutes

द्वाविंशः पाठः

वातावरणम्	n. neut	वायुमण्डल	atmosphere
आपगा	n. fem	नदी	river
एधः	n. neut	काष्ठ	wood
समित्	n. fem	समिधा	twig, fuel for kindling sacred fire
आहुतिः	n. fem	आहुति	offering an ol lation
पुरोडाशः	n. mas	यज्ञ की रोटी	sacrificial loaf of ground rice
संस्रवः	n. mas	यज्ञ में घी की विशेष बूंद	drop of clarified butter in sacrifice
मन्युः	n. mas	क्रोध	wrath
उत	adv	और	and
इषुः	n. mas	बाण	arrow
शरत्	n. fem	वर्ष	year
घोषः	n. mas	ध्वनि	sound
कुड्या	n. fem	भीत	wall
उद्रेकः	n. mas	अधिकता	excess

त्रयोविंशः पाठः

हेम	n. neut	स्वर्ण	gold
बाणः	n. mas	तीर	arrow

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समरः	n. mas	युद्ध	battle
शरः	n. mas	बाण	arrow
राघवः	n. mas	श्रीराम	Ram Chandra Ji, descendant of Raghu

चतुर्विंशः पाठः

कस्तूरी	n. fem	मृगमद	musk
कातरः	adj	डरपोक	coward
विष्णुपदम्	n. neut	वैकुण्ठ । मुक्ति	Divine abode, salvation
शक्रः	n. mas	इन्द्र	king of gods
त्वरितः	adj	शीघ्र	rapid
पुरंध्री	n. fem	स्त्री । कुटुम्बिनी	matron, woman
कलावान्	n. mas	चन्द्रमा	moon
ग्रावा	n. mas	पाषाण	stone
द्रावः	n. mas	पिघलाना	melting
कर्मठः	adj	अच्छा काम करनेवाला	one who does well
उद्योतः	n. mas	उजाला	illumination
खद्योतकः	n. mas	जुगनू	glow-worm
द्यौ-तलम्	n. neut	आकाश	sky
ध्वान्तम्	n. neut	अँधेरा	darkness
ध्वंसः	n. mas	नाश	end
निवहः	n. mas	समूह	group
पांसुः	n. mas	धूलिकण	particle of dust
हेमगिरिः	n. mas	सुमेरु	Sumeru
रजताद्रिः	n. mas	कैलाश	Kailash
शाखोटः	n. mas	सहोड़ा	a tree
निम्बः	n. mas	नीम	neem tree
कुटजः	n. mas	कुड़ा	a tree

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पञ्चविंशः पाठः

पोतः	n. mas	जहाज़	ship
सांयात्रिकः	n. mas	जहाज़ के द्वारा व्यापार बनेवाला	one who trades through ships
किरातीं	n. fem	भीलनी	Bheel's wife
करिकुम्भः	n. mas	हाथी की कनपटी	elephant's temple
छलनम्	n. neut	धोखा	fraud
अवद्यम्	adj	निन्दनीय	condemnable
अन्यतरत्	adj	दो में से एक	either of the two
प्रत्ययः	n. mas	विचार	conception
अपगमः	n. mas	शान्त होना। हटना	removal
उदीरितः	adj	उक्त। कहा हुआ	spoken
डिण्डिमः	n. mas	घण्टी	bell
हस्तिपकः	n. mas	महावत	elephant's driver

षड्विंशः पाठः

मुसलम्	n. neu	मूसल	pestle
दैर्घ्यम्	n. neu	लम्बाई	length
चटकः	n. ma	चिरौंटा, चिड़ा	sparrow
न्यायः	n. ma	कहावत	maxim
रन्ध्रम्	n. ne	छिद्र	hole
खल्वाटः	adj	गंजा	bald
विहङ्गमः	n. m	पक्षी	bird
कटाहः	n. m	कड़ाही	pan
सूची	n. f	सुई	needle

सप्तविंशः पाठः

पङ्कम्	n.	कीचड़	mud
निधनम्	n.	मृत्यु	death
पृथुलः	ad	चौड़ा	broad

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अष्टाविंशः पाठः

निवहणः	adj	मारनेवाला	killer
तालः	n. mas	ताल का पेड़	palmyra tree
विपचीनः	adj	सर्वत्र व्याप्त	spreading everywhere
मतङ्गजः	n. mas	हाथी	elephant
नगः	n. mas	पर्वत	mountain
संरब्धः	adj	क्रुद्ध	angry
रुट्	n. fem	क्रोध	wrath
प्रकरः	n. mas	राशि	heap

नवविंशः पाठः

शतमन्युः	n. mas	इन्द्र	King of gods
प्रतिमः	adj	समान	like
तिग्मः	adj	तेज़	sharp, pointed
नदीष्णः	adj	नदियों का ज्ञाता	knowing the rivers
आह्वायकः	adj	बुलानेवाला	messenger
अध्वन्यः	adj	मार्ग में हितकारी	good for journey
उद्वाहः	n. mas	विवाह	matrimony
प्रत्तः	adj	दिया हुआ	given
प्रतारितः	adj	छला हुआ	deluded
पादुका	n. fem	खड़ाऊँ	sandals (wooden)
सचिवः	n. mas	मन्त्री	minister
पुष्पकम्	n. neut	कुबेर का वायुयान	the aeroplane of the treasurer of the gods.

त्रिंशः पाठः

श्रोत्रियः	mas	वेदविद्	student of the veda
स्वाध्यायः	mas	वेदादि धर्मग्रन्थों का नित्य पाठ	daily study of saciptures

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

खात् (खम्)	neut	आकाश	sky
अराजकम्	"	ग़दर की हालत	in a state of anarchy
आर्जवम्	.	निष्कपट भाव	straight-forward ness

एकत्रिंशः पाठः

संक्रमयितुम्	inf	बदलने को, देने को	to transfer
जरा	fem	बुढ़ापा	old age
आसाद्य	adv	प्राप्त करके	having obtained
विषयान्	mas	इन्द्रियों के विषय	objects of senses
अनुदिनम्	adv	प्रतिदिन	daily
हविषा (हविः)	neut	आहुति जो अग्नि में डाली जाय	oblation
कृष्णवर्त्मा	mas	आग	fire
निर्द्वन्द्वः	mas	रागद्वेषादि से विमुक्त	free from the trammels of the pairs of opposites
निर्ममः	mas	ममता शून्य	free from sense of possession

द्वात्रिंशः पाठः

नभः	neut	आकाश	sky
संवृतम्	mas	ढका हुआ	overcast
सन्निभः	adj	सदृश	resembling
अम्बुधरः	mas	बादल	cloud
विद्युत्	fem.	बिजली	lightning
संयुगः	mas	युद्ध	battle

त्रयस्त्रिंशः पाठः

पुष्करिणी	fem	सर	lake
झष	mas	मछली	fish
गाम् (गौः)	fem	भूमि	earth

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अनिलः	mas	वायु	air
विहङ्गमः	"	पक्षी	bird

चतुस्त्रिंशः पाठः

सूत्रधारः	mas	रङ्गमञ्च का अध्यक्ष	stage manager
(नेपथ्ये)	neut	परदे के पीछे	behind the curtain
काञ्चुकीयः	mas		Chamberlain, in charge of the inner apartments
		महलात का दारोग़ा	of a royal house
मन्त्रयित्वा	adv	मशविरा करके	having consulted
मन्त्रशाला	fem	सलाह मशविरा करने का स्थान	House of Parliament
अभिषेकः	mas	पवित्र स्नान	Sacred bath
सम्भ्रमः	mas	गड़बड़	confusion
समुदाचारः	mas	यथोचित सत्कार	proper etiquette
भारः	"	जुर्माना	fine

पञ्चत्रिंशः पाठः

शपथः	mas	क़सम	oath
अभिव्यज्यते	verb	प्रकटित होता है	is made manifest
अस्थि	neut	हड्डी	bone
कैरवचक्रवालम्	"	कुमुदस्थली	bed of lily flowers
उपानत्गूढ (उपानह्	fem)	जूते से ढका हुआ	covered with a shoe
संहतिः	fem	एका	union
दाक्षिण्यम्	neut	साधु व्यवहार	courtesy

———

Kirtikant Sharma Collection, Najafgarh